### मुनिश्रीप्रशमरतिविजयविरचिता

# शुभाभिलाषा

## (अनुवादसहिता)

# शुभाभिलाषा

(अनुवादसहिता)

**रचना**

तपागच्छाधिराजपूज्यपादाचार्यवर्यश्रीमद्—

विजयरामचन्द्रसूरीश्वराणां शिष्यः

**मुनिः प्रशमरतिविजयः**

**श्रुतभवनसंशोधनकेन्द्रम्**

**पुणे**

**श्रुतदीपग्रन्थश्रेणिः ३०**

| | | |
|---|---|---|
| **ग्रंथनाम** | - | शुभाभिलाषा (अनुवादसहिता) |
| **कर्ता** | - | मूल - मुनिश्री प्रशमरतिविजय<br>टीका तथा अनुवाद - अमोघ प्रभुदेसाई<br>गुजराती अनुवाद - सा. श्री धन्यहंसाश्रीजी म. |
| **विषय** | - | उपदेश |
| **भाषा** | - | संस्कृत, गुजराती, हिंदी, अंग्रेजी |
| **प्रकाशक** | - | श्रुतदीप रिसर्च फाउंडेशन- श्रुतभवन संशोधन केंद्र, पुणे |
| **पत्र** | - | १० + ८२ = ९२ |
| **आवृत्ति** | - | प्रथम, वि.सं.२०७५, ई.२०१९ |
| **मूल्य** | - | १५० रु. |
| **स्वामित्व** | - | श्रमणसंस्थाधीनश्रुतदीपानुसन्धानसंस्थानम्। |
| ISBN | - | 978-81-941972-5-6 |

**-: प्राप्तिस्थल :-**

| | | |
|---|---|---|
| **पुणे** | : | **श्रुतभवन संशोधन केन्द्र**<br>४७/४८ अचल फार्म, आगम मंदिर से आगे,<br>सच्चाई माता मंदिर के पास, कात्रज, पुणे-४११०४६<br>Mo.7744005728 (9-00am to 5-00pm)<br>www.shrutbhavan.org Email : shrutbhavan@gmail.com |
| **अहमदाबाद** | : | **श्री उमंगभाई शाह**<br>बी-४२४, तीर्थराज कॉम्प्लेक्स, वी. एस. हॉस्पिटल के सामने<br>मादलपुर, अहमदाबाद. मो.०९८२५१२८४८६ |
| **मुंबई** | : | **श्री गौरवभाई शाह**<br>सी/१११, जैन एपार्टमेंट, ६० फीट रोड, देवचंद नगर रोड, भायंदर (वेस्ट) मुंबई-४०११०१. मो.०९८३३१३९८८३ |
| **सुरत** | : | **श्री सेवंतीलालभाई मेहता**<br>ओंकारसूरि ज्ञानमंदिर, सुभाष चौक,<br>गोपीपुरा, सुरत - ३९५००१ मो. ९८२४१५२७२७ |
| **मुद्रण** | : | **नूतन आर्ट,** अहमदाबाद |

# प्रकाशकीय

पूज्य मुनिप्रवर श्री **प्रशमरतिविजयजी** विरचित **शुभाभिलाषा** श्री संघ के करकमल में समर्पित करते हुए हमें आनंद की अनुभूति हो रही है। इस कृति में परम पूज्य आचार्यवर्य श्रीमद् **विजयरामचंद्रसूरीश्वरजी** महाराज साहब के जिनाज्ञानुसारी उपदेशों का संकलन किया गया है। श्रुतभवन संशोधन केन्द्र के सन्निष्ठ समर्पित सहकारिगण की कड़ी मेहनत और लगन से दुर्गम कार्य सम्पन्न हुआ है। इस अवसर पर श्रुतभवन संशोधन केन्द्र के संशोधन प्रकल्प हेतु गुप्तदान करने वाले दाता एवं श्रुतभवन संशोधन केन्द्र के साथ प्रत्यक्ष-अप्रत्यक्ष रूप से जुड़े हुए सभी महानुभावों का हार्दिक अभिनन्दन करते हैं। हम उन संस्था एवं विद्वानों के भी आभारी है जो हमें मार्गदर्शन और सहाय करते हैं।

इस ग्रंथ के प्रकाशन का अलभ्यलाभ आचार्यदेव श्रीमद् **विजयमुक्तिप्रभसूरीश्वरजी** महाराजा की प्रेरणा से श्रीमती **सौ. कांताबेन चंपकलाल धनरेशा** एवं श्रीमती **सौ. अलकाबेन उदयभाई गुजर** की दीक्षा में उत्पन्न ज्ञानद्रव्य से **दीक्षा महोत्सव समिति, पुणे** ने प्राप्त किया है। आपकी अनुमोदनीय श्रुतभक्ति के लिये हम आपके आभारी है। अक्षरयोजन का कार्य नूतन आर्ट के धर्मेशभाई पटेल ने उत्साह से किया। एतदर्थ उनको धन्यवाद।

**डॉ. जितेंद्र शाह**
(मानद विश्वस्त)

# श्रुतप्रेमी

परमपूज्य व्याख्यान वाचस्पति
आचार्यदेव श्रीमद् **विजयरामचन्द्रसूरीश्वरजी** महाराजा
के शिष्यरत्न
सिंहगर्जना के स्वामी परमपूज्य
आचार्यदेव श्रीमद् **विजयमुक्तिचन्द्रसूरीश्वरजी** महाराजा
के पट्टधर
परमपूज्य प्रशमरसपयोनिधि
आचार्यदेव श्रीमद् **विजयजयकुंजरसूरीश्वरजी** महाराजा
के शिष्यरत्न
पूर्वभारतकल्याणकभूमितीर्थोद्धारक परमपूज्य
आचार्यदेव श्रीमद् **विजयमुक्तिप्रभसूरीश्वरजी** महाराजा
की प्रेरणा से
श्रीमती **सौ. कांताबेन चंपकलाल धनरेशा** एवं
श्रीमती **सौ. अलकाबेन उदयभाई गुजर** की
दीक्षा में उत्पन्न ज्ञानद्रव्य से
**दीक्षा महोत्सव समिति, पुणे**

# अनुक्रमणिका


| | | पत्राङ्कः |
|---|---|---|
| मनोगत | मुनिश्री प्रशमरतिविजय | १ |
| શુભાભિલાષા : અવતરણની કથા | મુનિશ્રી વૈરાગ્યરતિવિજયગણી | ७ |
| સાહિત્ય માંગે છે : સર્જન-સંવર્ધન-સંરક્ષણ | આચાર્ય વિજયમુક્તિપ્રભસૂરિ | ८ |
| संसारासक्तिक्षयार्थं शुभाभिलाषा एव समर्था | पं.श्री धनपाल हाबळे | १० |
| शुभाभिलाषा सह संस्कृत टीका | | १ |
| शुभाभिलाषा हिंदी भावार्थ | अमोघ प्रभुदेसाई | ३५ |
| शुभाभिलाषा गुजराती भावार्थ | सा.श्री धन्यहंसाश्रीजी | ४९ |
| शुभाभिलाषा अंग्रेजी भावार्थ | अमोघ प्रभुदेसाई | ६२ |
| परिशिष्ट १ | पारिभाषिक पदार्थों का विवरण | ७३ |
| परिशिष्ट २ | श्लोकों का अकारादि क्रम | ७५ |

# मनोगत

सिद्धांतमहोदधि पूज्यपाद आचार्यभगवंत श्रीमद्विजय**प्रेमसूरीश्वरजी** महाराजा स्वयं अनेक शास्त्रों के प्रणेता थे एवं आपने अपने अनेक साधुओं को शास्त्रप्रणेता बनाया था। आपके अपने पट्टशिष्य व्याख्यानवाचस्पति पूज्यपाद आचार्यभगवंत श्रीमद्विजय**रामचंद्रसूरीश्वरजी** महाराजा के व्याख्यानों के विषय में इच्छा और आग्रह के साथ एक अपेक्षा व्यक्त की थी। वो अपेक्षा थी पूज्यपाद आचार्यभगवंत श्री **विजयरामचंद्रसूरीश्वरजी** महाराजा के गुजराती व्याख्यानों को संस्कृत भाषा में ढालने की। पूज्यपाद आचार्यभगवंत श्री विजय **प्रेमसूरीश्वरजी** महाराजा ने कहा था कि ऐसा करने से श्रीरामचंद्रसूरिजी के व्याख्यान शास्त्र बन जाएंगे।

**शुभाभिलाषा प्रकरणम्**, महान् गुरु के स्वप्न को और महान् शिष्य की वाणी को संस्कृत श्लोकों में अवतरित करने का एक प्रयास है।

शास्त्र वो होता है जिस में भाषा का एक स्वतंत्र मिज़ाज मिले।

शास्त्र वो होता है जिसको आप कंठस्थ कर सकें।

शास्त्र वो होता है जिसका बार-बार स्वाध्याय हो सके।

शास्त्र वो होता है जिसको व्याख्यान, वाचना और विवेचन द्वारा अर्थविस्तार मिल सके।

**शुभाभिलाषा प्रकरणम्** की रचना पूज्यपाद आचार्यभगवंत श्री **विजयरामचंद्रसूरीश्वरजी** महाराजा के दीक्षाशताब्दी वर्ष निमित्त की गई है। पूज्य सूरिभगवंत की वाणी संस्कृतभाषा के माध्यम से अब सहस्राब्दियों तक जीवंत रहेगी यह एक अहोभावपूर्ण आनंद है।

मैंने जब ये श्लोक लिखें तब तनिक भी सोचा न था कि इनके उपर संस्कृत टीका, गुजराती, हिंदी तथा अंग्रेजी अनुवाद जैसे कार्य होंगे। पू. बंधुमुनिराजश्री वैराग्यरतिविजयजी म. का आशीर्वाद और वात्सल्य है तभी ये सब हो पा रहा है।

**वाराणसी** **प्रशमरतिविजय**
**चैत्र शुक्ला ६**
**वि. सं. २०६७**

# શુભાભિલાષા : અવતરણની કથા

આજથી લગભગ ત્રેવીસેક વરસ પહેલા પરમ શ્રદ્ધેય ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય **હેમભૂષણસૂરીશ્વરજી** મહારાજાની પ્રેરણાથી **'શુભાભિલાષા'**ની રચના થઇ હતી. 'જિનવાણી'માં તે ક્રમશઃ પ્રકટ પણ થવા માંડી હતી પણ કોઇ કારણસર એ અટકી ગઈ. આઠ વરસ પહેલા તે નાની પુસ્તિકા રૂપે પ્રગટ થઇ. શ્રુતભવનની મુલાકાતે આવેલા સાંગલીના દિગંબર પંડિત શ્રી **ધનંજય હાબળે**ને એ ખૂબ ગમી ગઇ. તેમણે તેનો અનુવાદ કર્યો. તેને વ્યવસ્થિત કરીને **શુભાભિલાષા** ત્રણ ભાષામાં અનુવાદ સાથે પ્રગટ થઈ રહી છે.

બંધુ મુનિરાજશ્રી **પ્રશમરતિવિજયજી** મ.સા. સિદ્ધહસ્ત કવિ છે. સંસ્કૃત, પ્રાકૃત, ગુજરાતી અને હિંદી આ ચારેય ભાષામાં તેમની કાવ્યપ્રતિભા સહજપણે અવતરે છે. તેમની રચનાઓમાં મૌલિકતા પણ છે અને સહજતા પણ. તેમની રચનાઓની ગેયતા, પ્રાસાદિકતા એટલી રંજક છે કે અનાયાસે શ્રોતા રસવિભોર બની જાય છે. એકવીસમી સદીમાં મહાકાવ્યની રચના કરનારા જૂજ કવિઓ પૈકી એ એક છે. **'શુભાભિલાષા'** તેમની ચોથી પદ્ય રચના છે. આ પૂર્વે તેમણે **माणिभद्रमहाकाव्यम्, स्मृतिमन्दिरप्रशस्तिकाव्यम्, संवेगरतिप्रकरणम्, स्याद्वादसङ्कीर्तनम्, हेमसङ्कीर्तनम्**ની રચના કરી છે.

**'શુભાભિલાષા'**ની રચનાનો ક્રમ હજી પણ જારી છે. તેમના દ્વારા આવી સહજ, બોધભરી રચનાઓ નિરંતર મળ્યા કરે એ જ શુભ અભિલાષા

૨૦૭૫, મહા વદ ૩ **- વૈરાગ્યરતિવિજય**

## સાહિત્ય માંગે છે : સર્જન-સંવર્ધન-સંરક્ષણ

ગ્રંથનું નામ છે - **શુભાભિલાષા....**

આ શુભાભિલાષા શબ્દ આંખ સામે આવે છે અને એવા એક મહાપુરુષનો પડછાયો આંખ સામે આવીને ઊભો રહે છે કે જે મહાપુરુષને આ વિશ્વમાંથી પાર્થિવદેહે વિદાય લીધે વર્ષની એક પચ્ચીસીથી વધુ સમય પસાર થઈ ચૂક્યો છે છતાં પરમ પૂજ્ય આચાર્યદેવ શ્રીમદ્ **વિજયરામચંદ્રસૂરીશ્વરજી મહારાજા** આ નામે વિશ્વની દીવાલોમાં પડતા પડઘા હજુ એમની સ્મૃતિનું સર્જન કર્યા વિના રહેતા નથી.

તેઓશ્રી કોઈને પણ પત્ર લખતા તો છેલ્લે એક શબ્દનો પ્રયોગ કરતા - **'શુભાભિલાષા'** અને એ શુભાભિલાષા પણ સામાન્ય કક્ષાની નહિ, સામાન્ય ગણાતા આત્માને ય અસામાન્ય એવા મોક્ષે પહોંચાડવા માટેની જ રહેતી.

એ મહાપુરુષના પ્રવચનો અને પ્રવચનોમાં આવતા એક એક વાક્યો સો ટચના સોનાના સિક્કા જેવા ગણાતા. જેની શ્રોતાઓ ઉપર અમોઘ અસર ઉભી થતી.

તેઓના પ્રવચનમાં મોક્ષ, સંયમ અને સંસાર આ શબ્દ કેટલી વાર આવતા હશે તે કહેવું મુશ્કેલ છે

'મોક્ષ જ મેળવવા જેવો છે. સંયમ જ લેવા જેવું છે અને એ માટે આ સંસાર જ છોડવા જેવો છે' આ ત્રણ વાત તેઓના પ્રવચનમાં સતત ઘુમરાયા કરતી. જેની ફળશ્રુતિરૂપે શ્રોતાના હૈયામાં મોક્ષ-સંયમ અને સંસાર આ ત્રણ તત્ત્વની હેયોપાદેયતા માટે એક જબ્બર ઘમ્મરવલોણું જાગૃત થતું. અને અનેક આત્માઓ અસાર સંસારને સલામ ભરી સંયમના પંથે જવા સજ્જ બની જતાં.

રામબાણ જેવા ગણાતા સૂરિરામના આવા ટંકશાળી વચનોને સંસ્કૃત જેવી અઘરી ભાષામાં અને એ ય પાછા પદ્યરૂપે ગુંથવાનું કામ વિદ્વાન મુનિરાજ શ્રી **પ્રશમરતિવિજયજી**એ કરેલ છે જે આ ગ્રંથમાં લિપિબદ્ધ બનેલ છે.

મુનિરાજ શ્રી **પ્રશમરતિવિજયજી**ના વ્યક્તિત્વના બે કિનારા છે. એક કિનારે સંસ્કૃત સાહિત્યનું સર્જન છે તો બીજા કિનારે ગુર્જરસાહિત્યનું સર્જન છે.

તેઓનું ગુર્જર ગદ્યસાહિત્ય અને પદ્યસાહિત્ય તો ખૂબ જ વખણાય છે પરંતુ તેઓના સંસ્કૃત પદ્યસાહિત્યમાં ય એટલી સરલતા અને સુગમતા જણાય છે કે શબ્દો બોલતા જાવ ને શબ્દોમાંથી ભાવ ઊભો થતો જાય જેને સંસ્કૃતમાં પ્રાસાદ અલંકારનું સ્વરૂપ આપવામાં આવ્યું છે.

મુનિરાજ શ્રી **વૈરાગ્યરતિવિજયજી** ગણિવર તથા મુનિરાજ શ્રી **પ્રશમરતિવિજયજી** મ. બન્ને સંસારી પક્ષે સગાભાઈ છે તો સંયમ પક્ષે મોટા-નાના ગુરુભાઈઓ છે સરસ્વતીએ બન્નેને સાહિત્યસર્જનનું વરદાન આપ્યું છે. સાહિત્યનું સર્જન, સાહિત્યનું સંરક્ષણ અને સાહિત્યનું સંવર્ધન બન્નેનાં જીવનનો મુદ્રાલેખ છે.

સૂરિરામ માટે એમ કહેવાય છે કે તેઓ શાસ્ત્ર અને સિદ્ધાંતના જ એક પર્યાય હતાં. એ જે બોલતા તે શાસ્ત્ર બની જતું, કારણ એમનું બોલાયેલું પ્રત્યેક વચન શાસ્ત્રનાં કોઈને કોઈ પાનાં પર છૂપાયેલું જેવા મળતું.

**શુભાભિલાષા**માં ગૂંથાયેલ પદ્યાત્મક સૂરિરામના વચનો નિઃસંદેહ સર્વોપયોગી સાબિત થશે. વ્યાખ્યાતાઓ એ પદ્ય પર વ્યાખ્યાન કરશે. વિવેચકો એ પદ્ય પર વિવેચના કરશે. લેખકો એ પદ્યનો આધાર લઈ રહસ્યોદ્ઘાટક વિસ્તૃત લેખો લખશે.

આ ગ્રંથમાં નવરચિત સંસ્કૃત શ્લોકો છે. સાથે જ સંસ્કૃતમાં તે શ્લોક ઉપરની ટીકા પણ છે અને તેમજ તે શ્લોકોનો ગુજરાતી-હિંદી તથા અંગ્રેજી ભાષામાં કરાયેલ ભાવાર્થ પણ છે. જે તેની સર્વોપયોગિતાનું પૂરક તત્ત્વ છે.

**શ્રુતભવન સંશોધન કેંદ્ર, પૂના** દ્વારા પ્રગટ થતો આ ગ્રંથ સહુ કોઈના હૈયામાં સમ્યગ્જ્ઞાન, સમ્યગ્દર્શન અને સમ્યક્ચારિત્રનો ત્રિમુખી દીપ પ્રગટ કરનાર બને એજ શુભાભિલાષા.

જૈન ઉપાશ્રય **- આચાર્ય વિજયમુક્તિપ્રભસૂરિ**

લોણાવલા (મહારાષ્ટ્ર)
વિ.સં.૨૦૭૫- પો.સુદ-૪

# संसारासक्तिक्षयार्थं शुभाभिलाषा एव समर्था

सम्यक् देवः, सम्यक् शास्त्रं, सम्यक् गुरुः इत्येतेषु त्रिषु परमपवित्रेषु मनोवचनकायानां भक्तिरूपा प्रवृत्तिः शुभोपयोगः कथ्यते। अतः शुभोपयोगेन जीवः सततं सातादिपुण्यकर्मास्रवं करोति प्रान्ते परमानन्दं च प्राप्नोति।

**आत्मानः परमानन्दं प्राप्नुवन्तु भवक्षयात्।**

**एका शुभाभिलाषाऽस्ति सेयं सर्वसुखावहा॥**

अहमीदृशं मन्ये यथा एष श्लोकः तत्र शुभाभिलाषायाः शुभारम्भो भवतु वा समाप्तिश्लोको वा भवतु। एष श्लोकः अतीवमहत्त्वपूर्णः भवति अस्मिन् काव्ये। यतः सर्वे श्लोकाः अस्मात् श्लोकात् जायन्ते सर्वे श्लोकाः एतस्मिन् श्लोके समाविशन्ति च।

**मुनिवरश्रीप्रशमरतिविजय**महोदयेन संस्कृतभाषायाम् अतीव महत्त्वपूर्णा काव्यरचना कृतास्ति। अनेन न केवलं जैनसमाजोपरि अपि तु भारतराष्ट्रस्योपरि अनन्तोपकाराः कृताः। मुनिवरस्य संस्कृतकाव्यरचनोत्कृष्टास्ति। मह्यम् अतीव रोचते।

**१) माणिभद्रमहाकाव्यम्** **२) स्मृतिमन्दिरप्रशस्तिकाव्यम्**

**३) संवेगरतिप्रकरणम्** **४) स्याद्वादसङ्कीर्तनम्**

**५) हेमसङ्कीर्तनम्** **६) शुभाभिलाषाकाव्यमिति**

मुनिवररचितानि सर्वाणि काव्यानि ज्ञानस्य महासागराः भवन्ति।

यथाकाशे सूर्यः स्वकिरणैरन्धकारं नाशयति तथा **शुभाभिलाषा**काव्यं स्वज्ञानकिरणैरज्ञानान्धकारं नाशयति। सर्वार्थेणेदं काव्यं कण्ठस्थीकरणीयम् अस्ति। अस्य काव्यस्य पठनेन सर्वे जनाः परमानन्दं प्राप्नुवन्तु इति जिनेन्द्रम् अहं प्रार्थये। विश्वजना मोक्षं सम्प्राप्नुवन्तु इति मम सदिच्छा वर्तते। प्रमादार्थं क्षम्यताम्।

विश्रामबाग- सांगली **- पं.धनपाल म. हाबळे**

तपागच्छाधिराजपूज्यपादाचार्यवर्यश्रीमद् विजयरामचन्द्रसूरीश्वरोपदिष्टा

मुनिश्रीप्रशमरतिविजयविरचिता

# ॥शुभाभिलाषा॥

जिनं नत्वा महावीरं सर्वसन्तापतारकम्।
टीकां शुभाभिलाषायाः कुर्वे भावार्थदर्शिकाम्॥

ग्रन्थारम्भे सर्वविघ्नविघाताय श्लोकत्रयेण युतं मङ्गलं क्रियते—

**जीयाज्जगज्जीवयोनिविज्ञाता जगतां गुरुः।**
**जगदानन्दनो वीरो जगद्भ्राता जगत्पतिः॥१॥**

**टीका**

**जीयादिति।** जगज्जीवयोनिविज्ञाता, जगतां गुरुः, जगदानन्दनः, जगद्भ्राता, जगत्पतिः वीरः जीयात्।

श्लोकेऽस्मिन् मङ्गलार्थं ग्रन्थकृता भगवान् वीरः संस्तूयते। स्वीयाध्यात्मिकनेत्राभ्यामखिलजगतो जीवानां योनेरुत्पत्तिस्थानस्य सम्यग्ज्ञाता, स्वीयार्हत्त्वात् प्राप्ताध्यात्मिकज्ञानस्योपदेशकत्वाज्जगतां गुरुः, मोक्षदायकत्वाज्जगदानन्दनः, मोक्षमार्गे बन्धुरिव सर्वेषां साहाय्यकत्वाज्जगद्भ्राता, विश्वपालकत्वात् सर्वेषामाराध्यत्वाच्च जगत्पतिर्भगवान् महावीरो जीयाज्जयतु। वीरातिवीरसन्मतिवर्धमानमहावीरादिभिः पञ्चनामभिः ख्यातस्य भगवतः पञ्च विशेषणानि॥१॥

अपि च,

**जगत्पितामहो जीयाद्भगवान्करुणालयः।**
**श्रुतानां प्रभवः स्वामी तीर्थेशानामपश्चिमः॥२॥**

**टीका**

**जगत्पितामह इति।** जगत्पितामहः, करुणालयः, श्रुतानां प्रभवः, तीर्थेशानाम् अपश्चिमः स्वामी भगवान् (महावीरः) जीयात्।

यथा कुटुम्बे पितामहः प्रमुखत्वेन वर्तते, स्वानुभवेन कुटुम्बिनां

मार्गदर्शनं करोति चिन्तां च वहति तथा भगवान् महावीरोऽखिलविश्वे प्रमुख आत्मज्ञानेनाज्ञजीवानां मार्गदर्शकश्चिन्तावाहकश्च। अतः कविनात्र जगत्पितामह इति वर्णितः। स्वयं करुणारूपः करुणाकरश्च सः साक्षात्करुणालय एव। तस्मादेव आगमानां निर्मितिर्जाता। अतः स श्रुतानां प्रभव इति निगद्यते। अपि च, सर्वेषां तीर्थङ्कराणामन्तिमः स्वामीति प्रसिद्धः। स भगवान् महावीरो जयतात्॥२॥

स एव सर्वेषां मोक्षदोऽस्त्विति प्रार्थ्यते—

**धर्ममार्गप्रदो लोकान्महात्मा जयताच्चिरम्।**
**नन्दीसूत्रस्य प्रारम्भे संस्तुतो मोक्षदोऽस्तु वः॥३॥**

**टीका**

**धर्ममार्गप्रद इति।** लोकान् धर्ममार्गप्रदः महात्मा चिरं जयतात्। नन्दीसूत्रस्य प्रारम्भे संस्तुतः (सः) वः मोक्षदः अस्तु।

स्वयं मुक्तोऽप्यन्येषां मुक्तये प्रयत्नरतः सर्वलोकान् धर्ममार्गप्रदो धर्ममार्गं दर्शयन् स महात्मा भगवान् महावीरश्चिरं जयतात्। आगमेषु प्रसिद्धस्य नन्दीसूत्रस्य प्रारम्भेऽपि श्लोकत्रये तस्य भगवतः स्तुतिर्वर्तते। स भगवान् महावीरो वो युष्माकं कृते मोक्षप्रदो भवत्विति कविः प्रार्थयति॥३॥

अग्रेऽर्हतामुपदेशविषय उच्यते—

**अनन्तोपकृतोऽर्हन्तः श्रीमन्तो यदुपादिशन्।**
**तदेव सर्वदा चित्ते धारणीयं शुभेच्छुकैः॥४॥**

**टीका**

**अनन्तोपकृत इति।** श्रीः सम्पत्तिर्ज्ञानाख्या। तया युक्तैः श्रीमद्भिर्ज्ञानिभिरर्हद्भिरुपादिष्टो ज्ञानमार्गः शुभमिच्छद्भिर्जनैः सदा चित्ते धारणीयः। मोक्षमार्गदर्शकत्वेन तेऽनन्तोपकारकाः। अर्हत्पदस्य चतुर्विधा व्याख्या- अरिहननादर्हन्तः। अरी रज आवरणकर्माख्यः, तद्विनाशादर्हन्तः। रहस्याभावादर्हन्तः। अतिशयपूजार्हत्वाद् वार्हन्तः॥४॥

अधुना संसारस्य दुःखमयत्वं वर्ण्यते—

**संसारे दुःखमेवास्ति जन्ममृत्यादिसङ्गते।**
**तस्मिन्सौख्यरसाकृष्टा बध्यन्ते कष्टकोटिभिः॥५॥**

**टीका**

**संसार इति।** संसरणं संसारः। आत्मनः कर्मणा योगः संसारः। द्रव्यक्षेत्रकालभावभवेषु जीवस्य परिवर्तनं भ्रमणं वा संसारः। जन्ममृत्यादिसङ्गतेऽविच्छिन्नेऽस्मिन् संसारे दुःखमेवास्ति। किन्तु क्षणिकं सौख्यरसं दृष्ट्वा तस्मिन्नाकृष्टा जीवाः कोटिभिः कष्टैर्बध्यन्ते। इति संसारस्य हेयता॥५॥

तदेव द्रढयति—

**दुःखेनारभ्यते जन्म दुःखेनान्तश्च जन्मनः।**
**अनयोर्मध्यभागेऽपि दुःखानामेव सङ्गमः॥६॥**

**टीका**

**दुःखेनेति।** उभावपि जन्ममृत्यू दुःखकरौ। जन्म दुःखेनारभ्यते वेदनाभिर्भवति। जन्मनोऽन्तो मृत्युरपि दुःखेन जराव्याधिभिर्देहक्षयात्। जीवनरूपोऽनयोर्जन्ममृत्योर्मध्यभागोऽपि नानाप्रकारकैर्दुःखैरेव व्याप्तः। यानि सुखानीव भासन्ते तान्यप्यनित्यानि दुःखान्तान्येव। इति जन्मतो मृत्युपर्यन्तस्य दुःखमयस्य सम्पूर्णजीवनस्य हेयता॥६॥

जीवाः स्वयमेव स्वकीयदुःखं जनयन्ति—

**असारेऽपारसंसारे जीवाः सौख्याभिलाषिणः।**
**यत्कुर्वन्ति तदेतेषां दुःखानां वर्धकं भवेत्॥७॥**

**टीका**

**असार इति।** सौख्याभिलाषिणः सौख्यमिच्छन्तो मोहग्रस्ता जीवा अस्मिन्नसारे सारहीनेऽपारेऽगाधे च संसारे यत्कुर्वन्ति तत्तेषामेव दुःखवर्धकं भवेत्। शाश्वतसुखरहितत्वात् संसारस्यासारत्वम्। सुखाभिलाषिणां तत्रैव पुनर्बन्धनादपारत्वम्॥७॥

सुखविनाशस्य कारणम्—

**सौख्यं सम्पद्यतां सर्वं स एष भवरागिणः।**
**विचारस्तस्य सौख्यानां विनाशस्यैव कारणम्॥८॥**

**टीका**

**सौख्यमिति।** भवे संसारेऽनुरागो यस्य स भवरागी। सर्वं सौख्यं मम सम्पद्यतामिति भवरागिणो विचार एव तस्य सौख्यानां विनाशस्य कारणं भवति। सर्वाणि संसारसुखानि क्षणिकान्यन्ततो दुःखकराणि च॥८॥

सम्पत्तेः सुखदायकत्वं नास्तीति कथ्यते—

**सुखं प्रभूतसामग्र्या जीवानां लभ्यते यदि।**
**चिन्ताभारैः पराभूता लक्ष्मीवन्तस्ततः कथम्॥९॥**

**टीका**

**सुखमिति** प्रभूतसामग्र्या भौतिकसुखदायिवस्तूनां प्राचुर्येण यदि जीवानां सुखं लभ्यते, तर्हि लक्ष्मीवन्तो धनवन्तश्चिन्ताभारैः पराभूताः कथं दृश्यन्ते? यस्माल्लक्ष्मीवन्तोऽपि चिन्ताग्रस्तास्तस्मात् सम्पत्तिर्नैव सुखकारणमित्यर्थः॥९॥

जीवानां दुःखविषयकमज्ञानम्—

**सुखं परिग्रहे पश्यन् तदर्थं यतते सदा।**
**दुःखैराबध्यमानं स्वं नावगच्छत्यबोधवान्॥१०॥**

**टीका**

**सुखमिति।** *पत्नीपरिजनादानमूलशापाः परिग्रहाः* इत्यमरः (अमरकोशः ३.३.८५२)। अबोधवानज्ञजीवस्तस्मिन् परिग्रहे सुखं पश्यन् तदर्थमेव यतते। परिग्रहोऽपि क्षणिकत्वाद् दुःखकारणम्। एवं परिग्रहानुगामिनं दुःखैराबध्यमानं स्वमात्मानं सोऽज्ञो न पश्यति॥१०॥

अज्ञजीवानामविवेकिता—

**सौख्यभोगे मदोन्मत्ता निर्विवेका न जानते।**
**पुण्यनाशं पापबन्धं दुर्गतिं दुष्टभावनाम्॥११॥**

॥ टीका ॥

**सोख्यभोग इति।** सौख्यभोगे भौतिकसाहित्यस्य प्राचुर्येण तस्यैवोपभोगे रताः सम्पत्तिमदेनोन्मत्ता अहङ्कारावृताश्च निर्विवेका विवेकहीना अज्ञाः स्वकीयं पुण्यनाशं पापबन्धं दुर्गतिं दुष्टभावनां च न जानते न जानन्ति। तेषां पुण्यनाशः पूर्वतन-सत्कर्मप्राप्तसुखोपभोगात्, दुष्टभावना सर्वदा सुखाभिलाषित्वात्, पापबन्धः सुखार्थं दुष्कृत्यकरणाद् दुर्गतिश्च पापबन्धाद्भवति॥११॥

सुखलिप्सया पुण्यनाशो न कार्य इत्युपदिश्यते—

**केनचित्सुकृतेनाप्तं पुण्यं पूर्वभवे वरम्।**
**केवलं सौख्यलिप्साभिर्नाशनीयं न सज्जनैः॥१२॥**

॥ टीका ॥

**केनचिदिति।** पूर्वभवे पूर्वजन्मनि केनचित्सुकृतेन सत्कृत्येन प्राप्तमुत्कृष्टं पुण्यं सज्जनैः साधुभिः केवलं क्षणिकसुखानां लिप्साभिर्काङ्क्षाभिर्न नाशनीयम्। फलोपभोगे कर्मनाशः प्रसिद्ध एव। अतः सुखोपभोगात् पुण्यनाशः। सुकृतात्पुण्यार्जनं तत्त्वार्थसूत्रेष्वपि ज्ञापितम्- ***शुभः पुण्यस्याशुभः पापस्य*** (तत्त्वार्थसूत्रम् ६.३) इति॥१२॥

सुखं हि पापकारणमित्यग्रे वर्ण्यते—

**पापादेव हि दुःखानां सम्पातो दारुणो भवेत्।**
**सौख्यादेव च पापानामात्मना स्यात्समागमः॥१३॥**

॥ टीका ॥

**पापादिति।** दुःखानां दारुणो भीषणः सम्पातः पापादेव भवेत्। यतो हि दुःखभोगादेव पापनाशः। सौख्येनैव पापानामात्मना समागमः संयोगः स्यात्। तद्यथोक्तमेकादशे श्लोके॥१३॥

सुखमेव दुर्गतिकारणम्—

**सुखं सांसारिकं नूत्नैः कर्मबन्धैः समुद्भटैः।**
**ददाति दुर्गतिं जीवं तुच्छानन्दादनन्तरम्॥१४॥**

### ⊰ टीका ⊱

**सुखमिति।** सांसारिकं सुखं क्षणिकत्वात् तुच्छानन्दानन्तरं जीवं जीवाय नूत्नैः नवीनैः समुद्भटैर्दृढैः कर्मबन्धैर्दुर्गतिं ददाति। सांसारिकसुखार्थं कृतकर्मभिर्नूतनबन्धो निर्मीयते। अन्ततो दुर्गतिश्च प्राप्यते॥१४॥

सुखाभिलाषी जीवस्यावस्था—

**देहसम्पत्कुटुम्बाद्यैः सौख्यसम्पादने रतः।**
**भावनां पावनां दूरे जहात्यध्यात्मसाधिकाम्॥१५॥**

### ⊰ टीका ⊱

**देहसम्पत्कुटुम्बाद्यैरिति।** सुखाभिलाषी जीवो देहसम्पत्कुटुम्बादिपरिग्रह-द्वारा सर्वदा सौख्यसम्पादने रतो भवति। अध्यात्मसाधिकां मोक्षप्रदायिनीं पावनां पुण्यां भावनां दूरे जहाति, अज्ञानवशात्॥१५॥

इदानीं मनसो बन्धमोक्षकारणत्वं स्पष्टीक्रियते—

**सुखं दुःखं मनोभावैर्जायतेऽत्राहुरुत्तमाः।**
**मन एव मनुष्याणां कारणं बन्धमोक्षयोः॥१६॥**

### ⊰ टीका ⊱

**सुखमिति।** उत्तमा विद्वांस आहुर्यदत्रास्मिञ्जगति सुखं दुःखं च मनोभावैर्जायते। बाह्यघटकास्तु निमित्तमात्राः। तेषु संलग्नो मनोभाव एव वस्तुतः सुखं वा दुःखं वा जनयति। अतो मन एव मनुष्याणां बन्धमोक्षयोः कारणम्। यदि मनसि संयमो वर्तते तर्हि बाह्यघटकावलम्बिसुखस्य दुःखस्य वाविर्भाव एव न स्यात्। बन्धराहित्यं च स्यात्॥१६॥

सौख्यरसालीढचित्तस्य दुःखसहनेऽक्षमता—

**चित्तं सौख्यरसालीढं दुःखं सोढुं न पारयेत्।**
**हीने सौख्यरसे दुःखं सहसा सह्यते नरैः॥१७॥**

### ⊰ टीका ⊱

**चित्तमिति।** सौख्यरसालीढं सौख्यरसासमासक्तं चित्तं दुःखं सोढुं न पारयेत्।

सुखानुभवेन दुःखसहनशीलताया उपक्षयात्। किन्तु हीने सौख्यरसे नरैर्दुःखं सहसा सह्यते॥१७॥

सांसारिकदुःखस्य प्राचीनत्वम्—

**दुःखमायाति संसारे तत्र नास्ति नवीनता।**
**भवे भवेन्न चेद् दुःखं ततस्तत्किं शिवे भवेत्॥१८॥**

**टीका**

**दुःखमिति।** संसारो दुःखमय इत्यस्मिन्न किञ्चिन्नूतनम्। प्राचीनकालतो ज्ञानिभिस्तदनुभूतं ज्ञापितं चास्ति। अर्थात्, न तत्र किमप्याश्चर्यकरम्। यदि भवे संसारे दुःखं न भवेत्तर्हि किं तच्छिवे मोक्षस्थाने भवेत्? पृच्छेयं मोक्षे दुःखाभाव एवेत्यस्य दृढीकरणाय॥१८॥

सांसारिकजीवस्य वृत्तिद्वयम्—

**अनादेरत्र संसारात्सर्वाधिव्याधिसंयुतात्।**
**सम्पन्नाः सौख्यरागस्य दुःखद्वेषस्य वृत्तयः॥१९॥**

**टीका**

**अनादेरिति।** पूर्वतनीये श्लोके यत्संसारे दुःखस्य नवीनता नास्तीत्युक्तम्, तदेवाग्रे प्रतिपाद्यते। संसारस्त्वनादिः। तस्याधिव्याधिसंयुतत्वमप्यनादि। अतस्तदनुभवत्सु जनेषु सौख्यं प्रति रागः प्रेम तथा दुःखं प्रति द्वेष इति वृत्तिद्वयं सञ्जातम्॥१९॥

अज्ञजीवानां निजस्वभावविस्मरणम्—

**अज्ञानेनावृतैर्जीवैः स्वभावो विस्मृतो निजः।**
**सुखदुःखोपनिर्वृत्तः शान्तः कर्मोदयाहतैः॥२०॥**

**टीका**

**अज्ञानेनेति।** कर्मोदयेनाहतैः पराभूतैः कर्मोदयाहतैरज्ञानेन चावृतैर्जनैर्निजः स्वीयः सुखदुःखोपनिर्वृत्तः सुखदुःखाभ्यामुपरतः शान्तः स्वभावो विस्मृतः। स्वभावः प्रकृतिः। जीवः प्रकृत्या सुखदुःखलेशहीनः शान्तश्च। परं कर्मोदयाहतत्वात्

तदज्ञानाच्च स्वभावं विस्मृत्य सुखदुःखैराबद्धो भवति॥२०॥

सुखस्य दुःखमयता प्रतिपाद्यते—

**यस्मिन्पश्यत्यसौ सौख्यं तत्र दुःखपरम्परा।**
**कारुण्यसागरैः श्रीमज्जिनेन्द्रैरुपदर्शिता॥२१॥**

**टीका**

**यस्मिन्निति।** अस्मिन्संसारेऽसावज्ञजीवो यत्सौख्यं पश्यति, तत्तु बाह्येन्द्रियाणां क्षणिकं सुखम्। अन्ततस्तद् दुःखपरम्परायामेव विपरिणमते। सा दुःखपरम्परा कारुण्यसागरैः श्रीमज्जिनेन्द्रैरुपदर्शिता। अज्ञानवशाद्भवसागरे पतितानां जीवानां कृतेऽपारकारुण्यप्रदर्शनाद् भगवतः कारुण्यसागरत्वेन निर्देशः॥२१॥

जीवस्य सौख्यदुःखादिवेदनम्—

**जीवः शरीरसंयोगाद्दुःखानामस्ति भाजनम्।**
**देहे रागाद्भवेज्जीवे सौख्यदुःखादिवेदनम्॥२२॥**

**टीका**

**जीव इति।** शरीरसंयोगद्वारा जीवो दुःखानां भाजनं पात्रं भवति। जीवस्य शरीरसंयोगाद् दुःखसङ्ग्राहकत्वेन भाजनत्वम्। जीवस्य देहे शरीरे रागान् ममत्वात् तत्रस्थसुखदुःखानामपि निजत्वेन वेदनम्॥२२॥

कायरहिततया दुःखनाशः—

**कायेन रहितावस्था प्राणिना लभ्यते यदा।**
**दुःखानां लवलेशोऽपि तदास्मिन्नावशिष्यते॥२३॥**

**टीका**

**कायेनेति।** यदा प्राणिना कायरहितावस्था शरीररहितावस्था लभ्यते तदा तस्मिन् दुःखानां लवलेशोऽपि नावशिष्यते। यथा पूर्वमेवोक्तम्, शरीरसंयोगेन दुःखसम्बन्धो जायते। अतस्तन्निराकरणोपायः कथ्यते कायरहितावस्था प्राप्तव्येति॥२३॥

सा कथं प्रापणीयेत्यस्मिन्विषय उच्यते—

**शरीरं पुद्गलोपज्ञं जातं कर्मप्रभावतः।**
**कर्मनाशप्रवृत्तस्य दुःखनाशो ध्रुवं भवेत्॥२४॥**

**टीका**

**शरीरमिति।** कर्मप्रभावत एव पुद्गलजन्यम् औदारिकपुद्गलनिर्मितं भौतिकं शरीरं जायते। कर्मनाशाय प्रवृत्तस्य जीवस्य दुःखनाशोऽपि ध्रुवं निश्चितं भवति। कर्मबन्धनाशाच्छरीरराहित्यं दुःखनाशश्च॥२४॥

सुखदुःखयोर्लक्षणं दर्शयति—

**दुःखमेकं हि संसारे कर्मसत्तापराश्रयः।**
**सौख्यमेकं हि संसारे कर्मसत्तापराजयः॥२५॥**

**टीका**

**दुःखमिति।** संसारे कर्मसत्तापराश्रय एव एकं दुःखम्। तथा च कर्मसत्तापराजय एव एकं सुखम्। यतो हि कर्मसत्ता एव जन्ममृत्युचक्रे बध्नाति। कर्मसत्तायाः पराजय एव मोक्षाख्यसुखाय भवति॥२५॥

कर्मनाशाय पुरुषार्थस्यावश्यकता प्रतिपाद्यते—

**धनाद्युपार्जने जीवैः पुरुषार्थो विधीयते।**
**तथैव कर्मनाशाय यतनीयं विशेषतः॥२६॥**

**टीका**

**धनाद्युपार्जन इति।** यथा धनाद्युपार्जने जीवैः पुरुषार्थो विधीयते, तथैव तैः कर्मनाशाय विशेषतो यतनीयम्। आदिशब्देन स्त्रीपुत्रेत्यादिपरिग्रहो निर्दिश्यते। तत्प्राप्त्यर्थं कृता यत्नाः बन्धायैव भवन्ति। कर्मनाशार्थं कृता यत्नास्तु बन्धमोचका भवन्ति। अतस्तदर्थमेव यतनीयम्॥२६॥

श्रेयोधर्मस्य प्रतिपादनमधुना क्रियते—

**येन देहे निरासक्तिर्येन कर्मक्षयो भृशम्।**
**स धर्मः श्रेयसां मार्गो भवान्तो येन जायते॥२७॥**

## टीका

**येनेति।** येन देहविषयिण्यासक्तिर्विनश्यते, भृशं कर्मक्षयो भवति, भवस्य संसारस्यान्तो जायते स एव धर्मः श्रेयसां मार्गः मोक्षमार्गः। मोक्षमार्गप्रवासः क्रमेणात्र निर्दिश्यते। ***धारणाद्धर्म*** इत्याहुः। यस्य धारणात्प्रथमं भौतिकविश्वं प्रति निरासक्तिर्जायेत, निरासक्तितः कर्मक्षयः पश्चाच्च कर्मबन्धनाशाच्छ्रेयःप्राप्तिर्भवेत् तादृशो धर्म आचरणीयः॥२७॥

भगवद्वचनाभ्यासस्य महत्त्वम्—

**स्वतन्त्रेण विचारेण कल्याणं नोपपद्यते।**
**भगवद्वचनाभ्यासाद्धर्मलाभो महोदयः॥२८॥**

## टीका

**स्वतन्त्रेणेति।** स्वतन्त्रेण विचारेण कल्याणं नैवोपपद्यते। श्रेयोमार्गः कठिनः। स्वतन्त्रविचारेण तत्र चलतोऽपि सहजतया स्खलनं शक्यम्। अतो भगवद्वचनानि सम्यगधीत्यैव तदुपदिष्टधर्मस्य लाभो ज्ञानं भवति। तस्यैव धर्मस्याचरणेन महोदयो मोक्षप्राप्तिर्भवति॥२८॥

धर्माभावाज्जायमानां जीवस्यावस्थामाह—

**सर्वदा सौख्यदुःखाद्यैर्द्वन्द्वभावैरुपावृतः।**
**भवे भवेऽभवज्जीवो न पुनर्धर्मचिन्तनैः॥२९॥**

## टीका

**सर्वदेति।** भवे भवे भवान्तरेषु जीवः सर्वदा सौख्यदुःखाद्यैर्द्वन्द्वभावैरुपावृतः। न पुनर्धर्मचिन्तनैः। अनन्तेष्वपि भवेषु स्वकर्मोपहतो जीवः सुख-दुःख-राग-द्वेषेत्यादिद्वन्द्वभावैरेव बद्धो नान्यत् किमपि धर्मविषयकं चिन्तितुं समर्थ आसीद्॥२९॥

रागद्वेषाभ्यां भोगादिप्रवृत्तेर्जीवस्य हानिमाह—

**तेन भोगादिप्रवृत्तिर्जीवस्य सहजाभवत्।**
**आराधनाविचारस्तु दुर्लभश्चापि दुष्करः॥३०॥**

## टीका

**तेनेति।** तस्माद् द्वन्द्वभावैरुपावृतत्वाद् भोगादिप्रवृत्तिरेव प्रत्येकस्मिन्भवे जीवस्य सहजा सहैव जायमाना भवति। भोग एव सुखं मन्यमानो जीवो नान्यत् किमपि चिन्तितुं शक्तः। तस्मादाराधनाविचारस्य भगवदुपासनाविचारस्याप्युद्भावस्त स्य मनसि दुर्लभो दुष्करश्च भवति॥३०॥

सुखदुःखानां विभ्रमताण्डवे जीवपतनम्—

**मोहाधीनां दशामेवमात्मधर्मवियोजिताम्।**
**धारयन्सुखदुःखानां पतेद्विभ्रमताण्डवे॥३१॥**

## टीका

**मोहाधीनामिति।** स भोगादिप्रवृत्तो जीव आत्मधर्मवियोजितां मोहाधीनां दशामेव धारयन् सुखदुःखानां विभ्रमताण्डवे महति भ्रमे पतति। लौकिकभोगानामेवाकर्षणात् स तदुत्पन्नसुखदुःखताण्डवे निपतति। स्वसामर्थ्यं विस्मृत्य तेषामेवाधीनो भवतीत्यर्थः॥३१॥

सम्यग्दर्शनलाभाज्जीवावस्था—

**सम्यग्दर्शनसम्पन्नो दुःखचित्तं जयत्यरम्।**
**मिथ्यात्वबाधितो दुःखैरन्तरङ्गैर्निपीड्यते॥३२॥**

## टीका

**सम्यग्दर्शनसम्पन्न इति।** सम्यग्दर्शनसम्पन्नो जीवो दुःखचित्तम् अरं शीघ्रं जयति। सम्यग्दर्शनात् ज्ञानलाभाल्लौकिकभोगानां तस्य तत्कालं वृथात्वदर्शनम्। परं मिथ्यात्वबाधितो जीवो लौकिकभोगानेव सत्यं मत्वा तेष्वेव निमज्जति। अन्तरङ्गदुःखैश्च निपीड्यते॥३२॥

सांसारिकजनस्य दुःखवृद्धिकारणम्—

**दुःखे द्वेषात्सुखे प्रीतेः सर्वः सांसारिको जनः।**
**यत्करोति ततस्तस्य दुःखवृद्धिः सुखव्ययः॥३३॥**

**टीका**

**दुःख इति।** पूर्वोक्तं द्वन्द्वभावोपावृतत्वमधिकृत्यात्रोच्यते- सांसारिको लौकिकसुखोपभोगे रतो जनो दुःखे द्वेषाद्वा सुखे प्रीतेर्वा यत्किमपि करोति तत्तस्य दुःखवृद्धेः सुखव्ययस्य च कारणं भवति। विरोधिभावानां द्वन्द्वमेव लौकिकजीवनम्। द्वन्द्वस्य द्वावपि विभागौ दुःखमेव जनयत इत्याशयः॥३३॥

जीवस्य चित्स्वभावबाधवर्णनम्—

**रागो द्वेषश्च जीवस्य सदैव सहगामिनौ।**
**अनयोस्तीव्रतावेशश्चित्स्वभावस्य बाधकः॥३४॥**

**टीका**

**राग इति।** रागस्तथा द्वेषो जीवस्य सदैव सहगामिनौ। जीवो रागद्वेषद्वन्द्वेन नित्यमुपावृतः। तयोस्तीव्रतावेशो भृशमाटोपो विवेकावरको भूत्वा चित्स्वभावस्य मूलचैतन्यस्य बाधको भवति। एवं रागद्वेषद्वन्द्वस्य सम्यग्दर्शनेऽन्तराय-कारित्वम्॥३४॥

अत्र रागनिन्दा क्रियते—

**तत्र रागस्तु जीवस्य महाशत्रुर्महाबलः।**
**येन रागो जितस्तेन निर्जितं सकलं जगत्॥३५॥**

**टीका**

**तत्रेति।** रागस्तु जीवस्य महाशत्रुर्वर्तते। महाबलः सः। जेतुं कठिनः। जीवस्तु बाह्यशत्रूणां निग्रहणार्थं यततेऽन्तःस्थशत्रुं विजेतुं तु नैव यतते। किन्तु येनेदं रहस्यं ज्ञात्वा रागो जितस्तेन सकलं जगदेव निर्जितम्। न तस्य दुःखकारणं किञ्चिद्विद्यते॥३५॥

द्वेषवासितविकारोत्पत्तिप्रक्रिया—

**यदवाप्तं यदिष्टं च तत्र रागप्रवृत्तयः।**
**रागेऽतृप्ते च जायन्ते विकारा द्वेषवासिताः॥३६॥**

**टीका**

**यदिति।** जीवने यदवाप्तं प्राप्तं यच्चेष्टमीप्सितं तत्र रागनिर्मिताव जीवस्य प्रवृत्तयो भवन्ति। इष्टे विनष्टे तथा इष्टेऽप्राप्ते रागस्य अतृप्तिवशाद् द्वेष वासिता विकारा जायन्ते ये दुःखमेव जनयन्ति॥३६॥

जीवस्य सर्वसौख्यप्राप्तिविषयकं विवेचनम्—

**सुकरो द्वेषविजयो दुष्करो रागनिग्रहः।**
**रागादपेतचित्तस्य सर्वसौख्यसमागमः॥३७॥**

**टीका**

**सुकर इति।** द्वेषस्य विजयः सुकरः। रागनिग्रहस्तु दुष्करः। द्वेषस्य रागजनितत्वात्। किन्तु यस्तद्दुष्करं कार्यं कर्तुं प्रभवति तस्य सर्वसौख्यसमागमो भवति। सौख्यानामपि सौख्यं चिरन्तनानन्दो मोक्षाख्यस्तस्य भवति॥३७॥

रागातुरजनमनोवस्थावर्णनम्—

**न तद्भूतं न तद्भावि यद्रागेणातुरो जनः।**
**प्रसन्नः स्यात्प्रशान्तः स्यात्प्रबुद्धः स्यात्कदाचन॥३८॥**

**टीका**

**नेति।** रागेणातुरो विकृतो जनः प्रसन्नः प्रशान्तः प्रबुद्धो वा स्यादिति न कदाचन भूतमभवन्न च भावि भविष्यति। प्रसन्नः सतोषभाग्। प्रशान्तः प्रतनुकषायः। प्रबुद्धः विवेकमतिः। रागातुरजनस्य क्षणिकसुखानुधावनात् प्राप्तेऽपि तस्मिन् कालेन नष्टत्वादन्तिमतो दुःखस्यैव प्राप्तत्वात् प्रसन्नताप्रशान्तताप्रबुद्धताराहित्यम्॥३८॥

विशारदानां प्राप्तव्यविषये कथ्यते—

**दुःखानां विरहेऽभीष्टे सौख्यानां चैव सङ्गमे।**
**निर्वाणपदसम्प्राप्तिः काङ्क्षणीया विशारदैः॥३९॥**

**टीका**

**दुःखानामिति।** यदि दुःखानां चिरन्तनविरहः सौख्यानां च

चिरन्तनसङ्गमोऽभीष्टस्तर्हि विशारदेन विदुषा निर्वाणपदसम्प्राप्तिर्मोक्षः काङ्क्षणीय एष्टव्यः। निर्वाणपदप्राप्तौ दुःखविरहितशाश्वतसुखप्राप्तेः॥३९॥

परमे पद आत्मनोऽवस्था श्लोकचतुष्टयेन वर्ण्यते—

**सर्वदा जीवितं नायुः क्षीयते परमे पदे।**
**नान्येषां सहयोगेन जीव्यते परमे पदे॥४०॥**

**टीका**

**सर्वदेति।** परमे पदे निर्वाणपदे सर्वदा जीवितमेव वर्तते। आयुस्तत्र न क्षीयते। अतो वृद्धत्वशरीरदौर्बल्यादिकं दुःखं तत्र नानुभूयते। अपि च संसारे वर्तमानोऽन्यसहयोगोऽपि क्षणिकत्वाद् दुःखकरः। अन्येषां सहयोगेन तत्र न जीव्यते। मोक्षे तु पूर्णतः स्वावलम्बनम्। इति परमपदस्य महत्ता प्रतिपादिता॥४०॥

**न रोगो नो जरा नैव क्षुधा तृट् परमे पदे।**
**दुःखस्यात्यन्तिको नाशो निरन्तः परमे पदे॥४१॥**

**टीका**

**नेति।** परमे पदे रोगो विकारो जरा वार्धक्यं क्षुधातृष्णादीनि भौतिकशरीरस्थानि दुःखानि न भवन्ति, सर्वदैव शरीराभावात्। तत्र दुःखस्यात्यन्तिकनाशो निरन्तः सर्वकालीनः च वर्तते। विनष्टं दुःखं न कदाचित् प्रत्यायाति। तेन दुःखनाशो निरन्तो मतः। शरीररहितत्वात्॥४१॥

**सर्वेषामेव सौख्यानां संवित्तिः परमे पदे।**
**आत्मनः कर्मनिर्मुक्तं स्वातन्त्र्यं परमे पदे॥४२॥**

**टीका**

**सर्वेषामिति।** परमे पदे सर्वेषामेव सौख्यानां श्रेष्ठतमानां चिरन्तनसुखानां संवित्तिः सम्प्राप्तिर्भवति। आत्मनः कर्मनिर्मुक्तं स्वातन्त्र्यमपि परमे पदे वर्तते। संसारे तु कर्मबद्धं पारतन्त्र्यमेव जीवस्य॥४२॥

**परमानन्दसंयोगोऽनिर्वर्ण्यः परमे पदे।**
**ततः श्रेयोऽर्थिना नूनं गन्तव्यं परमे पदे॥४३॥**

**॥ टीका ॥**

**परमानन्दसंयोग इति।** परमे पदेऽनिर्वर्ण्यः परमः चरमोत्कृष्ट य आनन्दः तस्य संप्राप्तिः भवति। लौकिकसुखानि तु क्षणिकानि। दुःखेन तेषां द्वन्द्वम्। दुःखमेव तेषामन्तः। परं परमानन्दस्य न केनापि द्वन्द्वम्। तस्य प्राप्तौ न कदापि दुःखावाप्तिः। तस्यानन्दस्य वर्णनमपि न शक्यम्। केवलमनुभूतिविषयो हि सः। ततः तस्माच्छ्रेयोऽर्थिना श्रेय इच्छता जीवेन परमे पदे परमं पदमेव गन्तव्यम्॥४३॥

सांसारिकसुखाभिलाषिणोऽवस्थाग्रे वर्ण्यते—

**अनवाप्य शिवस्थानं सुखान्याप्तुं य इच्छति।**
**पिपासाव्यथितः सोऽयं मृगनीराणि वाञ्छति॥४४॥**

**॥ टीका ॥**

**अनवाप्येति।** शिवस्थानं मोक्षस्थानमनवाप्यैव यः सुखान्याप्तुमिच्छति सोऽयमज्ञजीवः पिपासाव्यथितस्तृष्णात्रस्तो मृगनीराणि मृगजलान्येव वाञ्छति। यथा मृगजलानि केवलं भासमानजलानि पिपासाशमनायाशक्तानि तथैव भौतिकसुखान्यपि भासमानसुखानि शक्तिदानायाशक्तानि॥ केवलं मोक्षानन्दो हि चिरन्तनः॥४४॥

पवित्रधर्मसंयोगस्य सफलता कथं भवतीति वर्ण्यते—

**स्थापितो हृदये मोक्षो येन कल्याणकारिणा।**
**तेनैव धर्मसंयोगः पवित्रः सफलीकृतः॥४५॥**

**॥ टीका ॥**

**स्थापित इति।** कर्मबन्धक्षयेन मोक्षप्राप्तिरेव धर्मस्योद्दिष्टम्। अतो येन कल्याणकारिणा हृदये मोक्षः स्थापितस्तेनैव पवित्रो धर्मसंयोगः सफलीकृतः॥४५॥

भौतिकतुष्ट्यपेक्षया आत्मतुष्टियत्ना आवश्यकाः—

**पुत्रात्पत्न्यास्तथा पित्रोस्तुष्टिमिच्छन्ति जन्तवः**
**निजात्मनः सकाशात्तु नेष्यते सा कथं ननु॥४६॥**

**॥ टीका ॥**

**पुत्रादिति।** जन्तवः पुत्रात् पत्न्यास्तथा पित्रोस्तुष्टिमिच्छन्ति। तुष्टिं

सुखानुभूत्तिम् परमेतानि बाह्यसाधनानि एकभवास्थायित्वात् नश्वराणि। अन्ततो दुःखप्रदानि च। किंतु जन्तवो प्रतिभवं सहगामिना निजात्मना तुष्टिं कथं ननु नेच्छन्तीति प्रश्नः॥४६॥

इच्छानाशेनैवोत्कटसुखप्राप्तिः—

**यावदिच्छा न पूर्यन्ते तावद्दुःखोदयो ध्रुवम्।**
**इच्छैव नावशिष्येत तदा सौख्यं समुत्कटम्॥४७॥**

**टीका**

**यावदिति।** यावदिच्छा न पूर्यन्ते तावन्निश्चितमेव दुःखोदयो दुःखभोगो भवति। यत इच्छा स्वभावादतृप्ता एव तिष्ठन्ति। इच्छाभिर्जीवानां प्रवृत्तिर्जायते। ततश्च कर्मबन्धो भवति। कर्मबन्धस्तु सर्वदा दुःखायैव भवति। किन्तु यस्येच्छैव नावशिष्यते तस्य तूत्कटं सुखं भवति। तस्य कर्मसु प्रवृत्तिरेव न भवति दुःखमपि न जायते॥४७॥

धार्मिकाणां विषये विवेचनम्—

**इच्छाविसर्जनायेह जागृतो यः स धार्मिकः।**
**इच्छानुसारिणो हन्त सर्वे जीवा अधार्मिकाः॥४८॥**

**टीका**

**इच्छाविसर्जनायेति।** इहास्मिन् संसार इच्छाविसर्जनायेच्छात्यागाय यो जागृतः स एव धार्मिको धर्ममाचरति। यतः सर्वेच्छात्याग एव मोक्षाय धर्मो भवति। इच्छानुसारिणः सर्वे जीवास्त्वधार्मिका धर्मं न पालयन्ति। तेषामाचरणं दुर्गतिकारणमेव भवति॥४८॥

इच्छानुपूर्तिकार्यस्य परिणामः—

**यथा यथा प्रकुर्वन्ति कार्याणीच्छानुपूर्तये।**
**तथा तथा समुद्याति कोऽप्यसन्तोषपावकः॥४९॥**

**टीका**

**यथेति।** जीवा यथा यथेच्छानुपूर्तये कार्याणि कुर्वन्ति, तथा तथा चित्ते कोऽप्यसन्तोषपावकोऽसन्तोषाग्निः समुद्याति प्रज्वलति। इच्छानुपूर्तये पापाचरणमपि

कर्तुं जना उद्युक्ता भवन्ति। तेन पुनरसन्तोषाग्निर्जायते। तेनैवाग्निना ते जीवा दग्धा भवन्ति॥४९॥

अत उपदिश्यते—

**भगवानाह कर्तव्यं नेच्छानुवर्तनं भवे।**
**इच्छा संसारविस्तारकारिणी दुःखवर्धिनी॥५०॥**

टीका

**भगवानिति।** इच्छानुसारिवर्तनं भवे न कर्तव्यमिति भगवान् जिनेन्द्र आह। यतो हि इच्छा संसारविस्तारकारिणी दुःखवर्धिनी च भवति। इच्छानुसारिवर्तनेन कर्मबन्धस्य दृढीकरणं मोक्षाद् दूरवर्तिता च। इच्छानिवृत्तेरेव संसारनिवृत्तिर्दुःखक्षयश्च॥५०॥

धर्मस्य परमानन्ददायकत्वम्—

**धर्मः सौख्यकरः किन्तु सौख्यरागहरोऽप्यसौ।**
**तेन धर्मो मनुष्याणां परमानन्ददायकः॥५१॥**

टीका

**धर्म इति।** धर्मः सौख्यकरश्चिरन्तनात्मिकसुखकारी। असौ धर्मः सौख्यरागहरो लौकिकक्षणिकसुखरागस्य हर्तापि। एवं क्षणिकं विहाय शाश्वतं प्रति मार्गदर्शको धर्मो मनुष्याणां कृते परमानन्ददायको मोक्षप्रदाता भवति॥५१॥

अस्मिन्नेव जन्मनि पवित्रधर्मपालनं कर्तव्यम्, अन्यथा—

**दुर्लभं प्राप्य मानुष्यं धर्माद्दूरे भवन्ति ये।**
**तेषां कथं पुनर्लभ्यो धर्म आगामिजन्मनि?॥५२॥**

टीका

**दुर्लभमिति।** दुर्लभं मानुष्यं मनुष्यजन्म प्राप्यापि ये धर्माद् दूरे भवन्ति तेषां पुनर्धर्मः कथमागामिजन्मनि लभ्यः? निर्वाणायावश्यं धर्माचरणं केवलं मनुष्यजन्मन्येव शक्यम्। स च दुर्लभः। अतो यदि तं प्राप्य धर्माचरणं न क्रियते तर्हि पुनः पतितत्वान्

मनुष्यजन्मप्राप्तिनिश्चयाभावादागामिजन्मनि धर्माचरणमशक्यमेवेत्यर्थः। अतः प्राप्तेऽस्मिन् मनुष्यभव एव धर्माचरणं कर्तव्यम्॥५२॥

आत्मचिन्ताविषय आह—

**सुखासक्तिर्दुःखभीतिर्धृता जीवैः पुनः पुनः।**
**धर्मराग आत्मचिन्ता धार्यतामधुनैकदा॥५३॥**

**टीका**

**सुखासक्तिरिति।** सुखानामासक्तिर्दुःखस्य च भीतिर्जीवैः पौनःपुन्येन धार्यते। त एव संस्कारा लौकिकजीवने परम्परागताः। तान् सुखदुःखविचारान् त्यक्त्वैकदा धर्मं प्रति रागं प्रदर्शयितुमात्मविषये चिन्तां च कर्तुं विचारणीयंमिति॥५३॥

सौख्यरागस्यात्मनि विपरिणाम उच्यते—

**पापानि सन्ति यानीह ये दोषा ये च दुर्गुणाः।**
**आत्मन्यमी समुत्पन्नाः सौख्यरागेण केवलम्॥५४॥**

**टीका**

**पापानीति।** इह संसारे यानि पापानि दोषा दुर्गुणाश्चात्मनि जीवात्मनि सन्ति ते सर्वे केवलं सौख्यरागेण समुत्पन्नाः। लौकिकसुखं प्रति रागात् कर्मसूद्युक्तो जीवः पापानि दोषान् दुर्गुणान् चाङ्गीकरोतीत्याशयः॥५४॥

पापाचाररताणां व्यवहारः—

**पापाचाररताः कुर्युः दुष्कार्याणां शतान्यपि।**
**त्यक्त्वा लज्जां कुलाचारं पशवन्ति सुखैषिणः॥५५॥**

**टीका**

**पापाचाररता इति।** सुखैषिणः सुखमिच्छन्तः पापाचारे रताः सुखप्राप्त्यर्थं पापाचरणमपि कर्तुमुद्युक्ता जना लज्जां कुलाचारं च त्यक्त्वा दुष्कार्याणां शतान्यपि कुर्युः। पशवन्ति पशोरिवाचरणं कुर्वन्ति। पशूनामाचरणं केवलं लौकिकसुखप्राप्त्यर्थं भवति, न परमानन्दार्थम्, तथैवैतेषामपीत्यर्थः॥५५॥

अधुना दोषाणां परिणामो निगद्यते—

**आत्मनश्च परेषां च दोषा हानिप्रदाः खलु।**
**दोषैरपयशो भूरि दोषैर्दौर्गत्यभाग्भवेत्॥५६॥**

**टीका**

**आत्मन इति।** आत्मनो वा परेषां वा दोषास्तु हानिप्रदा हानिकरा एव। स्वदोषैरिव परेषां दोषा अपि हानिकराः कर्मसम्बद्धत्वात्। दोषैर्भूरि बह्वपयशो भवति। दोषैरेव जीवो दौर्गत्यभाग्भवति दुर्गतिं प्राप्नोति। यथा च दोषा लौकिकसुखाभिलाषया भवन्ति तथा पूर्वमेवोक्तम्॥५६॥

दुर्गुणाश्रयजीवस्य परिणामः—

**दुर्गुणैरशुभैर्येन सद्गुणा नाशिताः शुभाः।**
**दुर्गतिर्निश्चिता तेन सद्गतिश्च विलोपिता॥५७॥**

**टीका**

**दुर्गुणैरिति।** येन सुखाभिलाषिणा जीवेनाशुभदुर्गुणाश्रयणेन शुभाः सद्गुणा दूरीकृतास्तेनात्मीया सद्गतिर्विलोपिता दुर्गतिश्च निश्चिता। सद्गतिर्निर्वाणप्राप्तिः। दुर्गतिश्च कर्मबन्धात् पुनर्भवः। सद्गुणैः पुण्याचरणेन चित्तशुद्धिः। धर्माचरणाच्च निर्वाणम्। दुर्गुणाश्रयणेन तु पापाचरणात् कर्मबन्धः पुनर्भवकारी॥५७॥

अज्ञानां सुखेच्छादर्शनं कथं भवतीति कथ्यते—

**दुर्गुणानां च दोषानां पापानां च कलङ्किता।**
**सुखेच्छाबद्धचित्तानां तथारूपा न भासते॥५८॥**

**टीका**

**दुर्गुणानामिति।** सुखैराबद्धचित्तानामज्ञानग्रस्तानां दुर्गुणैर्दोषैः पापैश्च कलङ्किता सुखेच्छा तथारूपा न भासते, अन्यथा भासत इत्यर्थः। अज्ञा लौकिकसुखेच्छाया वास्तविकं स्वरूपं न जानन्ति। तां दुर्गुणपापदोषैर्युतामेव ते परमानन्दकारिणीं मन्यन्ते तस्यामेव रता भवन्ति॥५८॥

धार्मिकाणामपि मोहसन्तापः—

**मोहराजमहासैन्ये स्थिता रागादिका भटाः।**
**सन्तापं जनयन्त्येव धर्ममार्गस्थितानपि॥५९॥**

**⊰ टीका ⊱**

**मोहराजमहासैन्य इति।** मोहस्तु ससैन्यो राजा इव। रागादिकास्तस्य भटाः सैनिकाः। स मोहराजः स्वीयेन सैन्येन धर्ममार्गस्थानपि सन्तापं जनयति। सम्पूर्णः संसार एव मोहमयः। मोहजालानि यत्र तत्र सर्वत्र। अज्ञास्तु तेषु पतन्त्येव। परं तानि जालानि धर्ममार्गस्थान् ज्ञानिनोऽपि चित्ते सन्तापं निर्मान्ति॥५९॥

मोहं प्रति कथं वर्तितव्यमित्युपदिश्यते—

**मोहस्याभिभवं कुर्वन्स्वात्मारामसुखेच्छुकः।**
**रागद्वेषौ निबध्नीयाद्दासवत्स्वाङ्कुशं गतौ॥६०॥**

**-⊰ टीका ⊱**

**मोहस्येति।** मोक्षाख्यस्य स्वात्मारामसुखस्येच्छुको मोहस्याभिभवं पराभवं कृत्वा स्वाङ्कुशं गतौ स्वाधीनौ जातौ रागद्वेषौ तथा निबध्नीयात्, यथा दासो निबध्यते स्वामिना॥६०॥

रागद्वेषजयार्थं ग्रन्थिभेदप्रक्रिया वर्ण्यते—

**ग्रन्थिदेशास्थितः शुद्धं यथाप्रवृत्तिमाश्रितः।**
**अपूर्वकारणाद्धन्याद्रागद्वेषानुबन्धिकाम्॥६१॥**

**सम्यक्त्वं लभ्यतेऽनर्घ्यं जित्वा दर्शनसप्तकम्।**
**तस्मादाविर्भवत्येको विचारो मोक्षकेन्द्रितः॥६२॥**

**⊰ टीका ⊱**

**ग्रन्थिदेशास्थित इति।** इह हि जीवः सर्वेषामपि कर्मणां स्थितिः किञ्चिन्न्यूनैककोटाकोटिसागरोपमप्रमाणां करोति तदा सः ग्रन्थिदेशं प्राप्त इत्युच्यते। एतच्च नदीघोलपाषाणन्यायेन स्वयमेव सम्पद्यते, न पुरुषार्थमपेक्षते। अतस्तद्यथाप्रवृत्तकरणमित्युच्यते। चरमं च यथाप्रवृत्तकरणं शुद्धयथाप्रवृत्तकरणमुच्यते। अत्र स्थितस्य कस्यचिज्जीवस्य संसारेऽभूतपूर्वः कश्चित्परिणाम उत्पद्यते। स

एवापूर्वकरणमित्युच्यते। अनेनापूर्वकरणेन जीवो रागद्वेषरूपां निबिडां ग्रन्थिं भिनत्ति। ततश्च सम्यक्त्वमोहनीयं मिथ्यात्वमोहनीयं मिश्रमोहनीयमनन्तानुबन्धिनः क्रोधमानमायालोभान् अपनयति। एताः सप्तप्रकृतयः दर्शनसप्तकमित्युच्यन्ते।

दर्शनसप्तकं जित्वा जीवेनानर्घ्यममूल्यं सम्यक्त्वं सम्यग्दर्शनं तत्त्वार्थश्रद्धानं लभ्यते। तस्मात् तदनन्तरमेको मोक्षकेन्द्रितो विचार आविर्भवति॥६१-६२॥

मोक्षमार्गस्य सनातनी त्रिपदी वर्ण्यते—

**त्यक्तव्यः खलु संसारो ग्राह्यं संयमजीवनम्।**
**प्रापणीयश्च मोक्षोऽस्ति त्रिपदीयं सनातनी॥६३॥**

### टीका

**त्यक्तव्य इति।** संसारः खलु त्यक्तव्यः संयमजीवनं च ग्राह्यं मोक्षश्च प्रापणीय इति सनातनी शाश्वती त्रिपदी। मोक्षमार्गोऽनेन पदत्रयेण युक्तः। प्रथमं तावज्जीवस्य संसारत्यागो भोगमयजीवनान्निवृत्तिः। अनन्तरं संयमजीवनं श्रमणजीवनम्। एताभ्यां द्वाभ्यां कर्मबन्धाद्विमुक्तिर्निर्वाणपदप्राप्तिश्च भवति॥६३॥

मोक्षस्य महत्त्वम्—

**रोगोऽस्ति कर्मसंयोगो विकारो देहसङ्गतिः।**
**वेदना जायते जीवे मोक्षस्तु स्वास्थ्यमुत्तमम्॥६४॥**

### टीका

**रोग इति।** कर्मसंयोगो रोग इव। यथा रोगसंयोगाच्छरीरं जर्जरायते तथैव कर्मणा जीवस्स मूलस्वभावः। देहसङ्गतिस्तु विकारो विकृतिः। देहरहितमुक्तावस्था जीवस्य प्रकृतिः। परं कर्मबन्धाद्देहसंयोगविकारो जायते। एताभ्यां द्वाभ्यां जीवे वेदना जायते। तद्वेदनाविनाशतो मोक्ष एवोत्तमं स्वास्थ्यम्॥६४॥

मोक्षप्राप्तेः सुलभता—

**जीवः करोति निस्तन्द्रं प्रयत्नं स्वार्थसाधने।**
**तदर्धपुरुषार्थेण मोक्षो हस्तङ्गतो भवेत्॥६५॥**

### टीका

**जीव इति।** जीवः स्वार्थसाधने लौकिकसुखसम्पादने निस्तन्द्रमालस्यरहितं प्रयत्नं करोति। मोक्षस्तु तदर्धेणैव पुरुषार्थेण हस्तङ्गतो भवेत्। अज्ञानावृतजीवो यावतः कष्टान् अनित्यलौकिकसुखसम्पादनार्थं सहते तस्यार्धपरिमाणैरेव कष्टैर्नित्य आनन्दो मोक्षाख्यः प्राप्तुं शक्यते॥६५॥

अज्ञानवैचित्र्यवर्णनम्—

**अहो अज्ञानवैचित्र्यं दुःखसन्तानदायके।**
**संसारे सर्वजीवानामादरः कश्चिदुत्कटः॥६६॥**

### टीका

**अहो इति।** अहो महदिदमज्ञानवैचित्र्यमज्ञानस्य विचित्रता। दुःखसन्तानदायकेऽस्मिन् संसारे सर्वजीवानामादर उत्कटो वर्तते। किन्तु परमानन्दप्रदायके मोक्षमार्गे तु महाननादर एव भवति। वस्तुतो दुःखमये संसारेऽप्रीतिर्मोक्ष आदरश्चावश्यकः॥६६॥

सम्यक्त्वस्य परमशान्तिदायकत्वम्—

**सम्यक्त्वं रागभावस्य द्वेषभावस्य मान्द्यकृत्।**
**श्रद्धाप्रकर्षतो दद्यात्परमां शान्तिमात्मनः॥६७॥**

### टीका

**सम्यक्त्वमिति।** सम्यक्त्वं रागभावस्य तथा द्वेषभावस्यापि मान्द्यकृन्मन्दताप्रापकं भवति। रागद्वेषद्वन्द्वं सम्यक्त्वेन शाम्यति। तदेव सम्यक्त्वं श्रद्धाप्रकर्षतः श्रद्धाभावप्राचुर्यादात्मनः परमां शान्तिं दद्यात्॥६७॥

सम्यक्त्वस्य संसारे स्थानम्—

**सम्यक्त्वमेव संसारे पीयूषं तापहारकम्।**
**मूर्च्छापसारकं सत्त्वधारकं पापवारकम्॥६८॥**

### टीका

**सम्यक्त्वमिति।** यथा पीयूषाख्यं पेयंवपुषः तापं हरति तथैव सम्यक्त्वं

संसारतापं हरति। अज्ञानमूर्च्छापसारकं सत्त्वधारकं पापवारकं च तद्भवति॥६८॥

अधुना पञ्चश्लोकैः सम्यक्त्वेनागता गुणा वर्ण्यन्ते—

**संसारावासनिर्वेदः पापमात्रानुतापनम्।**
**मनोरथाश्च धर्मस्य देवगुर्वोर्महादरः॥६९॥**

**टीका**

**संसारावासनिर्वेद इति।** संसारावासनिर्वेदः संसारनिवासं प्रति निर्वेद उद्वेगः, प्रत्येक-पापप्रवृत्ति-विषयः पश्चात्तापः, धर्माचरणस्य मनोरथास्तथा देवानां गुरूणां च प्रति महानादरः सम्यक्त्वेन जायते॥६९॥

**जिनाज्ञापारवश्यञ्च विधेरेकान्तमाग्रहः।**
**प्ररूपणाः स्फुरत्सत्या आचारः शास्त्रवर्णितः॥७०॥**

**टीका**

**जिनाज्ञापारवश्यमिति।** जिनाज्ञापारवश्यं जिनाज्ञाधीनता, विधेर्नियमानामेकान्तमत्यन्तमाग्रहः, स्फुरत्सत्याःप्ररूपणाः यथार्थोपदेशः, शास्त्रवर्णितः शास्त्रग्रन्थैर्निर्दिष्टो धर्माधिष्ठित आचार आचरणमित्यपि सम्यक्त्वलक्षणानि॥७०॥

**लक्ष्यवेधः साधनाया नित्यमावश्यिकी क्रिया।**
**भवभ्रमणभीरुत्वं निर्वाणस्मरणं सदा॥७१॥**

**टीका**

**लक्ष्यवेध इति।** साधनाया लक्ष्यं सुस्पष्टं कृत्वा वर्तनीयम्। नित्यमावश्यिकी क्रिया। आवश्यकक्रियाषट्कं वर्तते। तस्य पालनम्। सामायिक-स्तुति-वन्दन-प्रतिक्रमण-प्रत्याख्यान-कायोत्सर्गेति षडावश्यकानि। भवभ्रमणभीरुत्वं संसारे पुनःपुनरावर्तनस्य भीतिस्तथैव सदा नित्यं निर्वाणस्मरणं मोक्षपद एकाग्रतेत्यपि सम्यक्त्वलक्षणानि॥७१॥

**स्वाध्यायो ग्रन्थरत्नानां सौख्येषूद्वेगचिन्तनम्।**
**साम्यावलम्बनं दुःखे प्रव्रज्याग्रहणेच्छिता॥७२॥**

## टीका

**स्वाध्याय इति।** ग्रन्थरत्नानामागमादीनां तत्त्वज्ञानग्रन्थानां स्वाध्यायः, ग्रन्थेभ्यः प्राप्तेन ज्ञानेन लौकिकसुखानां क्षणिकत्वं ज्ञात्वा तेषां रागं निष्कास्य तेषूद्वेगचिन्तनम्, लौकिकदुःखानामुद्वेगं च निष्कास्य तेषु साम्यावलम्बनं समदृष्टिः, प्रव्रज्या संन्यासस्तस्मिन्निच्छितासक्तिरिति सम्यक्त्वलक्षणानि॥७२॥

सम्यक्त्वेन प्राप्तमन्यद्गुणत्रयं कथ्यते। तद्यथा—

**चेतसो निग्रहे यत्नः कर्मनिर्जरणे मतिः।**
**आत्मचिन्तारतिश्चैते सम्यक्त्वेनागता गुणाः॥७३॥**

## टीका

**चेतस इति।** चेतसो निग्रहे यत्नः, कर्मनिर्जरणे मतिः, आत्मचिन्तारतिश्च। अज्ञानां चित्तं तु सर्वदा विषयाननुधावति। ततः पापाचारो भवति। अतश्चित्तनिग्रह आवश्यकः। तस्मिन् जाते कर्मनिर्जरणे मतिर्भवति। नूतनकर्मनिर्माणं रुद्ध्वा प्राक्कृतकर्मणां निर्जरणं क्षयः कार्य इति मतिस्तत्र भवति। तथा च सर्वदात्मचिन्तन एव रतिर्भवति नान्यः कोऽपि लौकिकविषयस्तं सम्यग्जीवं रञ्जयितुं क्षमः॥७३॥

सम्यक्त्वे स्थितं गुणानां पञ्चकम्—

**प्रशमं चाथ संवेगं वैराग्यं सम्यगाश्रितः।**
**आस्तिक्यं करुणां चैव सम्यक्त्वं भावयेत्सुधीः॥७४॥**

## टीका

**प्रशममिति।** प्रशमः क्रोधादीनाम् उपशमः शान्तिः, संवेगो मोक्षाभिलाषा, वैराग्यं सुखेषूदासीनता, आस्तिक्यं जिनवचनास्था तथैव करुणा दयाभावः, चेति गुणान् सम्यगाश्रितः सुधीर्धीमान् सम्यक्त्वं भावयेत् सम्यक्त्वं चिन्तयेत्। प्रशमः संवेगो वैराग्यमास्तिक्यं करुणा च सम्यक्त्वे सति विद्यन्त इत्याशयः॥७४॥

धर्मात्मनो व्यवहारो वर्ण्यते—

**रागं दधाति धर्मात्मा गुणेषु गुणवत्स्वपि।**
**दोषे द्वेषं परं दोषिजनेषु करुणाभरम्॥७५॥**

### ⊰ टीका ⊱

**रागमिति।** धर्मात्मा सम्यक्त्वप्राप्तजीवो गुणेषु गुणवत्सु च रागं दधाति। यतो हि गुणैरेव सम्यग्धर्माचरणं शक्यम्। स दोषे द्वेषं दधाति। दोषाणां सन्मार्गभ्रंशकारणत्वात्। पुनर्दोषिजनेषु स करुणाभरत्वेन वर्तते। दोषाणां द्वेषः कर्तव्यो न दोषिजनानाम्। दोषिजनास्तु सम्यगुपदिष्टा गुणवन्तो भवितुमर्हन्ति। अतो न द्वेष्या इति॥७५॥

अधुना जिनाज्ञाया महत्त्वमुच्यते—

**जिनाज्ञा परमो धर्मो जिनाज्ञा परमा क्रिया।**
**जिनाज्ञा यत्र नास्त्यत्र न वा धर्मो न वा क्रिया॥७६॥**

### ⊰ टीका ⊱

**जिनाज्ञेति।** जिनाज्ञा परमः श्रेष्ठो धर्मः। जिनाज्ञा परमा क्रिया। जिनाज्ञा यत्र नास्ति तत्र वस्तुतो धर्मोऽपि नास्ति क्रियापि नास्ति॥७६॥

सौख्यस्य दुःखैरविनाभावित्वम्—

**संसारे भौतिकं सौख्यं यत्किञ्चिद्दृश्यतेऽत्र तत्।**
**दुःखैरस्त्यविनाभावि तेन सौख्यं हि दुःखकृत्॥७७॥**

### ⊰ टीका ⊱

**संसार इति।** अत्र संसारे यत्किञ्चिद्भौतिकं सौख्यं दृश्यते तद्दुःखैरविनाभावि सहैव वर्तते। दुःखेन विना लौकिकसुखस्यास्तित्वमेव नास्ति। 'सुखं सांसारिकम्... ददाति दुर्गतिम्' इति पूर्वमेवोक्तत्वात् (श्लो. १४)। तेन सौख्यं दुःखकृद् दुःखकारकमेव॥७७॥

दुःखनाशाय पापकर्म न कर्तव्यमित्युपदिश्यते—

**दुःखं पार्थिवमायाति यत्तत्कर्मापहारकम्।**
**तन्नाशाय न कर्तव्यं पापं कर्मानुबन्धकम्॥७८॥**

### ⊰ टीका ⊱

**दुःखमिति।** यत् पार्थिवं भौतिकं सांसारिकं दुःखं तत् कर्मापहारकम्।

दुःखभोगेन कर्मक्षयः। अतः सांसारिकदुःखनाशायान्यत् पापकर्म न कर्तव्यम्। तस्य कर्मणो नूतनबन्धनिर्मातृत्वात्। कर्मक्षये तु दुःखहानिर्निश्चितैव॥७८॥

अनित्यसुखलाभाय धर्माचरणं न कर्तव्यम्—

**धर्मो न सौख्यलाभाय कार्यो निर्वाणदायकः।**
**रूप्यकाणि न याच्यन्ते कदाचित्कोटिदायिनः॥७९॥**

**टीका**

**धर्म इति।** निर्वाणदायको मोक्षदायको धर्मः सौख्यलाभाय भौतिकसुखार्थं न कार्यो नाचरणीयः। यथा व्यवहारे कोटिदायिनो धनवतो रूप्यकाणि न याच्यन्ते, अपि त्वधिकं धनं प्रार्थ्यन्ते, तथैव परमसुखदायकं धर्माचरणं क्षणिकसुखार्थं नैव कर्तव्यम् अपि मोक्षार्थमेव कर्तव्यम्॥७९॥

तत्कर्तुरवस्थैवं स्यात्—

**यो हि भौतिकसौख्यार्थं धर्मप्रवृत्तिमाचरेत्।**
**कुर्यादयं स्वहस्तेन नूनं दौर्गत्यसर्जनम्॥८०॥**

**टीका**

**य इति।** तथापि, यदि कश्चिद् भौतिकसौख्यार्थं धर्मप्रवृत्तिमाचरेत् तर्हि स नूनं सत्यमेव स्वहस्तेन दौर्गत्यसर्जनमात्मनो दुर्गतेर्निर्माणं कुर्यात्॥८०॥

तत्कथमिति चेदुच्यते—

**न तृप्ता नैव तृप्यन्ते सौख्यभोगेन जन्तवः।**
**विनिर्वृत्तसुखाकाङ्क्षास्तृप्तिं यान्ति परां जनाः॥८१॥**

**टीका**

**नेति।** सौख्यभोगेन लौकिकसुखानामुपभोगेन जन्तवो नैव तृप्ता नैव कदाचित्तृप्यन्ते। लौकिकसुखाभिलाषा न शाम्यत्युपभोगेन, केवलं वर्धते। अतस्तेषां जन्तूनां दुर्गतिः। किन्तु येषां लौकिकसुखाकाङ्क्षा विनिवृत्ता ते जनाः परां तृप्तिं यान्ति, परमसन्तोषं प्राप्नुवन्ति॥८१॥

मुग्धा मनुजभवं यथा विकलं कुर्वन्ति तथाह—

**मानवीयो भवो मुग्धैः कर्मबन्धैः कलुष्यते।**
**विधीयते ह्यकर्तव्यं कर्तव्यं न विधीयते॥८२॥**

टीका

**मानवीय इति।** मानवीयो भवो मानवजन्म मुग्धैरज्ञै विविधानुचिंतमनो-वाक्-काय-व्यापारजनितैः कर्म बन्धैः कलुष्यतेऽशुद्धो भवति। मूढैः सर्वदाकर्तव्यं हि विधीयते क्रियते परं कर्तव्यं न विधीयते। कर्मबद्धेनाज्ञजीवेन कर्मबद्धत्वात्प्राप्तं लौकिकसुखमेव सुन्दरं मन्यमानेन सद्धर्माचरणं न क्रियते। तत्तस्य नूतनकर्मबन्धाय भवतीत्यर्थः॥८२॥

सम्पत्तेः परलोकेऽनुपयोगिता प्रस्थाप्यते—

**राजानो धनवन्तश्च मृता मुक्त्वात्र सम्पदः।**
**तथापि लक्ष्मीवाञ्छाभिर्विश्वमेतन्न मुच्यते॥८३॥**

टीका

**राजान इति।** बलाढ्या राजानो धनवन्तश्चात्रैव सम्पदो मुक्त्वा त्यक्त्वा मृताः। लोभाद् बहुयत्नैरर्जितं धनं न केनापि राज्ञा धनवता वा मृत्योः पश्चात् सह एव परलोकं नीतम्। प्राचीनकालत एवं दृष्ट्वाप्येतद्विश्वं लक्ष्मीवाञ्छाभिर्धनेच्छाभिर्न मुच्यते॥८३॥

अज्ञजीवस्यासमर्थता—

**अन्नपानादिसम्मोदैर्मन्वानः सुखितां निजाम्।**
**वासनायाः पारवश्यं नालं द्रष्टुं किलात्मनः॥८४॥**

टीका

**अन्नपानादिसम्मोदैरिति।** अन्नपानादिसम्मोदैः सुखैर्निजां सुखितां मन्वानो मन्यमानो जीव आत्मनो वासनायाः पारवश्यं वासनाधीनत्वं द्रष्टुं नालं समर्थः। योऽन्नपानादिक्षणिकसुखदायकैः पदार्थैरेवात्मानं सुखिनं मन्यते स स्वकीयं वासनाधीनत्वं लौकिकभोगेषु रतिं ज्ञातुं नैव समर्थो भवति॥८४॥

नरकायुर्बन्धकारणान्याह—

**परिग्रहारम्भबद्धा महत्त्वं लोकसाक्षिकम्।**
**अर्जयन्तो महामूढा बध्यन्ते नरकायुषा॥८५॥**

**टीका**

**परिग्रहारम्भबद्धा इति।** परिग्रहारम्भबद्धाः स्त्रीपुत्रधनादिलौकिकसुख-प्रदवस्तूनां सङ्ग्रहे रता लोकसाक्षिकं महत्त्वं लौकिकश्रेष्ठत्वमर्जयन्तो महामूढा आत्यन्तिकज्ञानरहिता जीवा नरकायुषा बध्यन्ते अर्थाद् नरके यान्ति॥८५॥

सम्यक्त्वयोगात् सद्गतिरित्याह—

**दानशीलतपोभावैर्धर्मचर्यापरायणाः।**
**यान्ति सम्यक्त्वसंयोगाद्गृहस्था अपि सद्गतिम्॥८६॥**

**टीका**

**दानशीलतपोभावैरिति।** सत्पात्रे दानम्, शीलं सद्वृत्तिः तथा च तपोभावेन धर्मचर्यापरायणा धर्माचरणे रता गृहस्था अपि सम्यक्त्वसंयोगात् सद्गतिं यान्ति। केवलं संन्यासेनैव न सद्गतिः सच्चरितानां गृहस्थानामपि तद्भाग्यमित्युपदेशः॥८६॥

तर्हिः संन्यासः केन स्वीकर्तव्यः? तत्रोच्यते—

**संसारस्य परित्यागः कर्तव्यस्तत्त्वचिन्तकैः।**
**दीक्षैव समुपादेया परमार्थावलम्बिनी॥८७॥**

**टीका**

**संसारस्येति।** तत्त्वचिन्तकैः सम्यग् विचारकैः स्त्रीपुत्रधनादिलौकिकसंसारस्य त्यागः कर्तव्यः। तथा च परमार्थावलम्बिनी परमार्थ एव स्थिता दीक्षा समुपादेया॥८७॥

अधुना दीक्षामाहात्म्यं वर्ण्यते—

**दीक्षाग्रहणसामर्थ्याभावो दोषो महान् न हि।**
**दीक्षाग्रहणवाञ्छाया अभावो दूषणं महत्॥८८॥**

**टीका**

**दीक्षाग्रहणसामर्थ्याभाव इति।** यदि कस्यचिद्दीक्षाग्रहणसामर्थ्यस्याभावो

भवेत् तर्हि न तत्र महान् दोषः। परं दीक्षाग्रहणवाञ्छाया दीक्षाग्रहणस्येच्छाया अभावो हि महद्दूषणम्। यतो हि इच्छायां सति कालान्तरेण प्रयत्नैः सामर्थ्यं त्वागच्छेदेव। यदीच्छैव न स्यात् तर्हि सामर्थ्येन किम्॥८८॥

तीर्थङ्कराणामपि दीक्षास्वीकारो निगद्यते—

**ये ये तीर्थङ्करा जाता जायन्ते भाविनस्तथा।**
**सर्वेऽप्येते परिव्रज्यापालनैरेव तारकाः॥८९॥**

### टीका

**य इति।** ये ये तीर्थङ्करा जाता ये च भाविनो भविष्यमाणा जायन्त एते सर्वेऽपि परिव्रज्यापालनेन दीक्षाधर्मानुपालनेनैव भवनिस्तारकपदवीभाजः अभवन्॥८९॥

दीक्षाग्रहणं कदा कर्तव्यमिति कथ्यते—

**अष्टवर्षवयस्येव दीक्षा ग्राह्या नरोत्तमैः।**
**अस्मिन्काले व्यतिक्रान्ते विलम्बकारिता मता॥९०॥**

### टीका

**अष्टवर्षवयसीति।** नरोत्तमैः संयमजीवनोत्सुकैः श्रेष्ठपुरुषैरष्टवर्षवयस्येव दीक्षा ग्राह्या। यदि तदनन्तरं दीक्षाग्रहणं क्रियते तर्हि सा दीक्षा विलम्बकारिता विलम्बेन स्वीकृता मता॥९०॥

दीक्षितस्य लाभो वर्ण्यते—

**दीक्षा यैरादृता तेषां जीवितं सफलं भवेत्।**
**दीक्षात्मनो महानन्दकारिणी पारमेश्वरी॥९१॥**

### टीका

**दीक्षेति।** यैर्दीक्षादृता सन्मानिता तेषां जीवनं सफलं भवेत्। यतो हि पारमेश्वरी दीक्षा आत्मनो महानन्दकारिणी परमानन्दकारिणी॥९१॥

सुयोग्यस्यैव दीक्षायोजनं कर्तव्यम्—

**दीक्षाधर्मोऽपि नापात्रे योजनीयः कदाचन।**
**वनराजप्रियादुग्धं मृत्पात्रे स्थाप्यते कथम्?॥९२॥**

## ⊰ टीका ⊱

**दीक्षाधर्म इति।** यद्यपि दीक्षाग्रहणं श्रेष्ठं तथापि स दीक्षाधर्मोऽपात्रे नैव योजनीयः। अपात्रेण दीक्षा न ग्राह्या, इति भावः। यथा वनराजप्रियादुग्धं सिंहयोषितुर्दुग्धं मृत्पात्रे नैव स्थाप्यते, सुवर्णपात्र एव स्थाप्यते, तथैव दीक्षापि सुयोग्यायैव दातव्या॥९२॥

दीक्षायां क्रमस्य महत्त्वम्—

**योग्यता प्रथमं साध्याऽऽराधनारसिकैरपि।**
**क्रमादेव भवेल्लाभो हानिरेव क्रमात्यये॥९३॥**

## ⊰ टीका ⊱

**योग्यतेति।** आराधनारसिकैर्गृहस्थैरपि प्रथमं धर्मस्य योग्यता साध्या पश्चाच्च दीक्षा ग्रहणीया। क्रमानुसारितया लाभो भवेत्। क्रमात्यये क्रमनाशे तु हानिरेव स्यात्। योग्यताप्राप्तेः पूर्वमेव दीक्षाग्रहणं पतनायैव स्यादित्यर्थः॥९३॥

अतो दीक्षाग्रहणस्य क्रमः श्लोकपञ्चकेनोच्यते—

**मार्गानुसारिता तत्र धर्मस्य प्रथमं पदम्।**
**पञ्चत्रिंशद्गुणै[1]रत्र स्वभावः साध्यते शुभः॥९४॥**

## ⊰ टीका ⊱

**मार्गानुसारितेति।** मार्गानुसारिता यथाक्रमं सन्मार्गानुसरणमेव धर्मस्य प्रथमं पदम्। पञ्चत्रिंशद्गुणैः शुभः स्वभावः साध्यते। अतः प्रथमतस्तेऽङ्गीकार्याः॥९४॥

**सम्यग्दर्शनलाभेन शमादीनां समुद्भवः।**
**धर्मस्य परमार्थस्य द्वितीयं मङ्गलं पदम्॥९५॥**

## ⊰ टीका ⊱

**सम्यग्दर्शनलाभेनेति।** सम्यग्दर्शनलाभेन सम्यग्दर्शनस्य प्राप्तेः प्रागुल्लिखितानां शमादीनां गुणानां समुद्भवो भवति। तदेव परमार्थधर्मस्य द्वितीयं पदं वर्तते॥९५॥

---

१ द्रष्टव्यं परिशिष्टं १.१

**अर्हद्धर्मैकनिष्ठानामेकविंशतिसद्गुणाः[१]।**
**प्रशस्ताः पुण्यवन्तश्च धर्मस्याग्रेतनं पदम्॥९६॥**

**टीका**

**अर्हद्धर्मैकनिष्ठानामिति।** अर्हद्धर्मैकनिष्ठानां, जिनधर्मे येषां सम्पूर्णा निष्ठा वर्तते तेषां, पुण्यवन्त एकविंशतिसद्गुणाः प्रशस्ताः। तेषां गुणानां प्राप्तिरेव धर्मस्याग्रेतनं तृतीयं पदम्॥९६॥

**भावश्रावकधर्मस्य गुणाः[२] सप्ताधिका दश।**
**द्वादशव्रत[३]संयुक्ताः पदं तावच्चतुर्थकम्॥९७॥**

**टीका**

**भावश्रावकधर्मस्येति।** भावश्रावकधर्मस्य सप्तदशगुणा अणुव्रतगुणव्रतशिक्षाव्रतादिद्वादशव्रतैः संयुक्तत्वं धर्मस्य चतुर्थं पदम्॥९७॥

**यथाशक्ति प्रयुज्यन्ते श्राद्धस्य प्रतिमा[४] अपि।**
**क्रमोऽयं भगवद्दीक्षाग्रहणस्य निरामयः॥९८॥**

**टीका**

**यथाशक्तीति।** यथाशक्ति शक्त्यनुसारेण एकादशश्राद्धप्रतिमा अपि प्रयुज्यन्ते। अयं भगवद्दीक्षाग्रहणस्य निरामयो निर्दोषः क्रम उक्तः। क्रमात्यये हानिस्तु पूर्वोक्तैव॥९८॥

दीक्षितस्य कर्तव्यानि श्लोकत्रयेणोपदिश्यन्ते—

**येनादत्ता गुरोः पार्श्वे दीक्षा पञ्चमहाव्रतैः[५]।**
**तेनाप्यध्यासनीयास्ता भावनाः[६] पञ्चविंशतिः॥९९॥**

---

१ द्रष्टव्यं परिशिष्टं १.२
२ द्रष्टव्यं परिशिष्टं १.३
३ द्रष्टव्यं परिशिष्टं १.४
४ द्रष्टव्यं परिशिष्टं १.५
५ द्रष्टव्यं परिशिष्टं १.६
६ द्रष्टव्यं परिशिष्टं १.७

## ⊰ टीका ⊱

**येनेति।** येन गुरोः पार्श्वे सकाशात् पञ्चमहाव्रतैर्दीक्षा आदत्ता स्वीकृता तेन जनेन पञ्चविंशति भावना अपि अध्यासनीयाः भावनीयाः॥९९॥

अपि च—

**विजेतव्यः प्रमादारिः गर्वो नाश्योऽसुखङ्करः।**
**ज्ञानमभ्यधिकं साध्यं गुरुः सेव्यश्च देववत्॥१००॥**

## ⊰ टीका ⊱

**विजेतव्य इति।** प्रमादारिः प्रमादाख्यः शत्रुर्विजेतव्यः। असुखङ्करो दुःखकारी गर्वो नाश्यो हन्तव्यः। अभ्यधिकमतिशयं ज्ञानं साध्यं प्रापणीयम्। देववच्च गुरुः सेव्यः॥१००॥

तस्मादपि—

**भेतव्यं परसंयोगादात्मा ध्येयो निरञ्जनः।**
**उपयोगः शुभोपाये स्थापनीयो निरन्तरम्॥१०१॥**

## ⊰ टीका ⊱

**भेतव्यमिति।** परसंयोगादनित्याद् दुःखकारकाद् भेतव्यम्। निरञ्जनः शुद्ध आत्मा ध्येयः। निरन्तरं सदैवोपयोग मनोभावः शुभोपाये सन्मार्ग एव स्थापनीयः॥१०१॥

अधुना साधुलक्षणं कथ्यते—

**मानापमानयोः साम्यं लाभेऽलाभे च तुल्यता।**
**सुखे दुःखे समाधिश्च साधोरेतत्सुलक्षणम्॥१०२॥**

## ⊰ टीका ⊱

**मानापमानयोरिति।** माने चापमाने च साम्यता, लाभे चालाभे च तुल्यता, सुखे च दुःखे च समाधिरिति साधोः सुलक्षणं ज्ञातव्यम्। नैतानि त्रीणि स्वतन्त्रलक्षणानि। अपि तु त्रिभिरुपलक्षितस्तिरस्कारासक्तिरहितो द्वन्द्वभेदाभाव

एवैकं लक्षणम्। अतः 'सुलक्षणम्' इत्येकवचनप्रयोगः॥१०२॥

सर्वेषां जीवनं तीर्थङ्कराणामुपदेशानुसारमेव स्यात्—

**तीर्थकृद्वचनैरेव वक्तव्यं सूक्ष्मबुद्धिभिः।**
**भगवद्भाषितैरेव जीवितव्यं प्रतिक्षणम्॥१०३॥**

**टीका**

**तीर्थकृदिति।** सूक्ष्मबुद्धिभिर्विचक्षणैस्तीर्थकृद्वचनैरेव तीर्थङ्करोपदेशानुसारमेव वक्तव्यम्। भगवद्भाषितैर्भगवद्भिस्तीर्थङ्करैरुपदिष्टैर्मार्गैरेव प्रतिक्षणं जीवितव्यम्॥१०३॥

तथा च—

**लोकसञ्ज्ञापरित्यागः कर्तव्यः सिंहपौरुषैः।**
**लोकार्थं जीवनं नास्ति शासनायास्ति जीवनम्॥१०४॥**

**टीका**

**लोकसञ्ज्ञापरित्याग इति।** सिंहपौरुषैः सिंह इव भृशं पराक्रमैर्लोकसञ्ज्ञायाः परित्यागः कर्तव्यः। लोकाभिप्रायभीरुत्वं त्यक्तव्यम्। यतो हि जीवनं लोकार्थं नास्त्यपि तु शासनाय जिनशासनायास्ति॥१०४॥

सत्यस्य महत्त्वं श्लोकद्वयेन कथ्यते—

**सत्यं ध्येयं च गेयं च रक्षणीयं च सात्त्विकैः।**
**सत्ययोगे हि धर्मोऽस्ति हते सत्ये हता वयम्॥१०५॥**

**टीका**

**सत्यमिति।** सात्त्विकैः सत्त्वयुक्तैः पुरुषैः सत्यमेव ध्येयं गेयं रक्षणीयं च। सत्ययोगे सत्येन युक्तत्वाद्धि धर्मोऽस्ति। सत्ये हते धर्मनाशाद् वयं सर्वेऽपि हता एव स्याम॥१०५॥

अतः—

**भूयानेकान्तवासोऽस्तु सत्यधर्मपरायणः।**
**न चासत्यसमायोगाल्लक्षलोकैर्महोत्सवः॥१०६॥**

⊰ **टीका** ⊱

**भूयानिति।** सत्यधर्मपरायणश्चेदेकान्तवासोऽपि भूयान् बहुतरोऽस्तु। किन्त्व-सत्यसमायोगाल्लक्षलोकैर्महोत्सवोऽपि मास्तु॥१०६॥

अधुना सर्वज्ञानां मतं स्थाप्यते—

**येन मार्गेण लभ्येत मोक्ष आगामुके भवे।**
**तेन मार्गेण गन्तव्यं सार्वज्ञानामिदं मतम्॥१०७॥**

⊰ **टीका** ⊱

**येनेति।** आगामुके आगामिनि भवे येन मार्गेण मोक्षो लभ्येत तेनैव मार्गेण गन्तव्यमिति सर्वज्ञानां मतं मान्यम्॥१०७॥

अन्ते सर्वेषां मोक्षाख्यं शुभमिष्यते—

**आत्मानः परमानन्दं प्राप्नुवन्तु भवक्षयात्।**
**एका शुभाभिलाषास्ति सेयं सर्वसुखावहा॥१०८॥**

⊰ **टीका** ⊱

**आत्मान इति।** सर्वे जीवात्मानो भवक्षयात् परमानन्दं प्राप्नुवन्त्वित्येवैका सर्वसुखावहा शुभाभिलाषास्ति॥१०८॥

इत्याचार्यवर्यश्रीमदात्मकमलदानप्रेमसूरीश्वरपट्ट-प्रभावकैः व्याख्यानवाचस्पतिभिः परमपूज्याचार्यवर्यैः श्रीमद्विजयरामचन्द्रसूरीश्वरैरुपदिष्टा तच्छिष्येण मुनिना प्रशमरतिविजयेन श्लोकनिबद्धा शुभाभिलाषा समाप्ता।

तट्टीका च प्रभुदेसाईत्युपाह्वेनामोघेन संयोजिता समाप्ता। विक्रमस्य द्विसहस्राधिकचतुःसप्ततितमे वर्षे श्रुतभवन इति।

श्रीमतां विजयरामचन्द्राणामुपदेशतः।
कृता शुभाभिलाषायाः टीका वोऽस्तु शुभप्रदा॥

**॥इति शुभाभिलाषाटीका॥**

तपागच्छाधिराजपूज्यपादाचार्यवर्य—
श्रीमद्विजयरामचन्द्रसूरीश्वरोपदिष्टा
मुनिश्रीप्रशमरतिविजयविरचिता

# ॥शुभाभिलाषा॥

## (हिंदी भावार्थ)

अखिल जगत् के जीवों की योनी के सम्यक् ज्ञाता, जगत् के गुरु, विश्व को आनंद प्रदान करने वाले, विश्व के भ्राता और पति भगवान् महावीर की जय हो। (१)

(यह ग्रंथ का आरंभिक मंगलाचरण है जिसमें कवि ने भगवान महावीर की स्तुति की है। खुद के आध्यात्मिक ज्ञान से भगवान विश्व के सभी जीवों की योनि (उत्पत्तिस्थान) जानते हैं। मोक्षमार्ग दिखाने के कारण वह विश्व के गुरु हैं। मोक्षदायक होने के कारण जगदानन्दन हैं। मुक्ति के लिए ज्येष्ठ बंधु की तरह साहाय्यकारी होने से जगद्भ्राता और सारे विश्व के आराध्य परमेश्वर होने से जगत्पति भी हैं। वीर, अतिवीर, सन्मति, वर्धमान, महावीर आदि पाँच नामों से ख्यात भगवान के लिए इस पद्य में पाँच विशेषणों का उपयोग किया है।)

जगत् के पितामह, करुणा के आलय, श्रुत के प्रभव और तीर्थंकरों के अंतिम स्वामी भगवान (महावीर) की विजय हो।

घर में जैसे पितामह खुद के अनुभव और ज्ञान से सभी जनों को मार्गदर्शन करते हैं, उसी तरह से भगवान भी आत्मानुभव और आत्मज्ञान से सारे विश्व को मोक्ष का मार्गदर्शन करते हैं। वह स्वयं करुणा के आलय हैं। उन्हींसे आगमों का विकास हुआ है। अतः वह श्रुत के प्रभव कहलाये गये हैं। तीर्थंकरों में वह अंतिम किंतु सर्वश्रेष्ठ भी हैं। (२)

विश्व को धर्ममार्ग दर्शाने वाले महात्मा चिरकाल तक विजयी हों। नंदीसूत्र के प्रारंभ में जिनकी स्तुति की गई है वह (भगवान महावीर) आपके मोक्षप्रद हों। (३)

शुभेच्छुक जीवोंने अनंत उपकारक श्रीमान् अर्हतों के उपदेश को चित्त में नित्य धारण करना चाहिए। (४)

जन्म और मृत्यु के साथ ही रहने वाले संसार में केवल दुःख है। सुखरस के प्रति आकर्षित होने वाले जीव संसार में कोट्यवधि कष्टों से बंध जाते हैं।

संसार का अर्थ होता है संसरण। जीव का खुद के कर्मों के फल से संयोग और रागद्वेषमोह में परिभ्रमण संसार कहलाता है। (५)

जन्म का आरंभ भी दुःख से होता है और अंत भी दुःख से होता है। इन दोनों के बीच में भी दुःखों से ही संगम होता है।

जन्म और मृत्यु दोनों दुःखकर हैं। जन्म भी वेदनाओं से होता है और मृत्यु भी व्याधि और वृद्धता के कारण शरीर के क्षय से होती है। इन दोनों के बीच के जीवन में भी विविध प्रकार के दुःखों का ही संगम बना रहता है। सुख का आभास कराने वाले अनुभव भी क्षणकाल में नष्ट होने के कारण अन्त में दुःखदायक ही रहते हैं। इसी कारण जन्म से लेकर मृत्यु पर्यंत संपूर्ण जीवन तिरस्करणीय है। (६)

इस असार और अपार संसार में सुख की अभिलाषा करने वाले जीव जो करते हैं उससे उनके दुःख ही बढ़ जाते हैं।

शाश्वत सुख का अभाव होने से संसार को असार कहा गया है। सुखाभिलाषी जीवों के संसार में ही पुनः पुनः बंधन के कारण पार करने के लिए कठिन होने से वह अपार कहलाया है। (७)

'सब सुख ही मिलें' यह भवरागी का विचार ही उसके सुखों के नाश का कारण होता है। (८)

भरपूर सामग्री से अगर जीवों को सुख प्राप्त होता तो धनवान व्यक्ति चिन्ताओं के भार से पराभूत कैसे दिखते?

धनवान व्यक्तियों के भी चिन्ताग्रस्त और दुःखी होने से सम्पत्ति और साधनसामग्री की विपुलता सुख का कारण नहीं मानी जा सकती। (९)

धनसंपत्ति और भार्यापुत्र आदि परिग्रह में सदैव सुख देखने वाला अज्ञ उसीको पाने के लिए प्रयत्न करता है। (लेकिन परिग्रह के भी अनित्य होने से) दुःखों से ही बंधे जाने वाले खुद को वह जानता नहीं। (१०)

(भौतिक) सुखों के उपभोग में रममाण, (संपत्ति के) मद से उन्मत्त, (अहंकार

के कारण) विवेकहीन जीव अपने पुण्यनाश, पापबंध, दुर्गति और दुष्ट भावना को नहीं जानते।

पूर्वकृत सत्कर्मों से सुख की प्राप्ति होती है, और सुख के उपभोग से उन पुण्य कर्मों का क्षय भी होता है। सर्वदा सुख की अभिलाषा रखने से मन में दुष्ट भावना का आविर्भाव होता है। सुख पाने के लिए दुष्कृत्य करने से पाप का बन्ध पडता है। और उस पापबन्ध से दुर्गति प्राप्त होती है। (११)

पूर्व जन्म में किसी सत्कर्म से प्राप्त किया हुआ श्रेष्ठ पुण्य सज्जनों ने केवल (भौतिक) सुख की इच्छा से नष्ट नहीं करना चाहिए।

फल के उपभोग से कर्म का क्षय होता है यह सिद्धांत है। अतः सुख के उपभोग से पुण्य का नाश होता है। तत्त्वार्थसूत्र में भी कहा गया है— "शुभ: पुण्यस्य अशुभ: पापस्य"। (त.सू. ६.३) (१२)

पाप कर्मों के कारण ही (जीव पर) दुःखों का दारुण आगमन होता है। सुख से ही पापों का आत्मा के साथ संगम होता है।

(इसके बारे में ग्यारह वे श्लोक में विस्तार से कहा है।) (१३)

सांसारिक सुख जीव को तुच्छ आनंद देने के बाद नये दृढ कर्मबन्धों के द्वारा दुर्गति देता है।

सांसारिक सुखों के अनित्य होने के कारण उन्हें तुच्छ कहा है। वह सुख पाने के लिए किये गये कर्म नये बंध निर्माण करते हैं और अंततः जीव को दुर्गति प्रदान करते हैं। (१४)

देह, संपत्ति, कुटुंब आदि द्वारा सुख पाने में रममाण जीव अध्यात्म प्राप्त कराने वाली पवित्र भावना को दूर छोडता है। (१५)

श्रेष्ठ विद्वानों का कहना है कि मन के भाव से ही सुख और दुःख निर्माण होते हैं। इसलिए मन ही मनुष्यों के बंध और मोक्ष का कारण है।

ज्ञातव्य है कि बाह्य घटक तो केवल निमित्तमात्र हैं। उनसे संलग्न मनोभाव ही सुख और दुःख पैदा करते हैं। इसलिए मन को बंध और मोक्ष का कारण कहा गया है। अगर मन पर संयम रखें तो बाह्य घटकों पर अवलंबित सुख या दुःख का आविर्भाव ही मन में नहीं होगा और बंधन भी नहीं होगा। (१६)

सुख के रस का अनुभव जिसने लिया है वह चित्त दुःख सहन करने में समर्थ नहीं होता। लेकिन सौख्यरस की कमी रहने से आदमी दुःख सहन करता है।

दुःख के अनुभव से जीव परिग्रह की व्यर्थता भी जानता है। (१७)

संसार में दुःख भोगना पडता है इसमें कुछ भी नवीनता नहीं। दुःख अगर संसार में नहीं रहेगा तो क्या मोक्ष में रहेगा?

मोक्ष में दुःख के अभाव के दृढीकरण के लिए यह पृच्छा की गई है। (१८)

सर्व प्रकार की आधिव्याधियों से युक्त इस अनादि संसार में सुख के प्रति राग (प्रेम) और दुःख के प्रति द्वेष की प्रवृत्तियाँ निर्माण हुई। (१९)

कर्मोदय से आहत और अज्ञान से आवृत जीव खुद का सुख और दुःख से निवृत्त शांत स्वभाव भूल जाते हैं। (२०)

यह (अज्ञ जीव) जिसमें भी सुख देखता है, वहाँ दुःख की ही परंपरा होती है। करुणा के सागर श्रीमान जिनेंद्र ने वह (परंपरा) दर्शायी है। (२१)

शरीर के संयोग से जीव दुःख धारण करने वाला पात्र बन जाता है। उस देह में ममत्व के कारण जीव में सुख और दुःख का अनुभव होता है। (२२)

जब प्राणी शरीररहित अवस्था प्राप्त करता है, तब उसमें दुःखों का लवलेश भी नहीं बचता। (२३)

कर्म के प्रभाव से ही 'पुद्गल' कहा जाने वाला शरीर उत्पन्न होता है। कर्मनाश के लिए प्रवृत्त जीव का दुःखनाश भी निश्चय से होता है। (२४)

संसार में कर्मसत्ता का आश्रित होना ही एकमात्र दुःख है। और उस कर्मसत्ता का पराजय करना ही एकमात्र सुख है। (२५)

धन आदि के उपार्जन में ही जीव बडे पुरुषार्थ करते हैं। वैसे ही कर्म के नाश के लिए विशेष यत्न करने चाहिए। (२६)

जिससे देह की आसक्ति नष्ट होती है, कर्म का पूर्णतः नाश होता है और संसार का अंत होता है वही धर्म श्रेयस का अर्थात् मोक्ष का मार्ग है। (२७)

स्वतंत्र विचार से कल्याण नहीं होता। भगवान के वचनों के अभ्यास से धर्मज्ञान प्राप्त कर (उस धर्म के अनुसार आचरण करने से) मोक्ष का लाभ होता है।

स्वतंत्र विचारों से यदि कोई धर्ममार्ग पर भी चलता है तो भी उसमें अहंकार का प्रवेश और मार्ग से स्खलन की संभावना अत्यधिक रहती है। इसलिए मोक्ष की इच्छा रखने वाले ने भगवान के वचनानुसार ही धर्ममार्ग पर चलना चाहिए। (२८)

जीव हर जन्म में सर्वदा सुख और दुःख के द्वन्द्व भावों से आवृत रहता है, लेकिन धर्म के चिंतन में मग्न नहीं रहता। (२९)

इस कारण जीव की भोग आदि में प्रवृत्ति उससे जन्म के साथ ही जुडी रहती है। ऐसे में आराधना का विचार भी दुर्लभ और दुष्कर बन जाता है। (३०)

इस प्रकार आत्मधर्म से वियुक्त और मोह की अधीन दशा धारण करने वाला जीव सुखदुःखों के भ्रम पैदा करने वाले तांडव में फँस जाता है। (३१)

सम्यक् दर्शन प्राप्त करने वाला जीव दुःखचित्त को शीघ्र ही जीतता है। मिथ्यात्व से बाधित जीव अंतरंग दुःखों से नित्य पीडित रहता है।

सम्यक् दर्शन प्राप्त होने से जीव सांसारिक भोगों की व्यर्थता समझता है, और दुःख से युक्त चित्त पर विजय पाता है। लेकिन मिथ्यात्व से बाधित जीव, जैसा पहले भी बताया गया है, अंतरंग के दुःखों से सर्वदा पीडित रहता है। (३२)

संसारी जीव दुःख के द्वेष और सुख के प्रेम के कारण जो भी प्रवृत्ति करता है, वह उसके दुःख की वृद्धि और सुख के क्षय का ही कारण बनती है।

सुख-दुःख, प्रेम-द्वेष आदि विरोधों से ही लौकिक जीवन भरा हुआ है। और इस द्वंद्व के दोनों विभाग दुःख के ही कारण बनते हैं। (३३)

राग और द्वेष सदैव जीव के साथ चलते हैं। इनका तीव्रता से होने वाला आवेश ही आत्मा के मूल चैतन्यस्वभाव का बाधक होता है। (३४)

उसमें भी राग जीव का महाशत्रु है। वह अत्यधिक बलवान भी है। अतः जिसने राग को जीता उसने सारा विश्व जीत लिया। (३५)

जो प्राप्त हुआ है और जिसकी प्राप्ति की आशा है उन दोनों में राग की प्रवृत्ति होती है। राग अतृप्त रहने से द्वेष पर आधारित विकार उत्पन्न होते हैं।

प्राप्त वस्तु के नाश से और इष्ट वस्तु की अप्राप्ति से राग अतृप्त रहता है। (३६)

द्वेष पर विजय पाना आसान है लेकिन राग का निग्रह करना कठिन है।

इसलिए जिस जीव ने खुद का चित्त राग से दूर कर लिया हो उसका मानो परमसुख से समागम हो गया।

द्वेष का मूल भी राग में होता है। इसलिए द्वेष पर विजय पाना राग के निग्रह से अधिक सरल है। (३७)

राग से आतुर व्यक्ति प्रसन्न, प्रशांत और प्रबुद्ध हो ऐसा कभी भी हुआ नहीं और आगे भी होगा नहीं। (३८)

दुःखों से विरह और सुख का (चिरंतन) संगम चाहिए तो विद्वानों ने निर्वाणपद (मोक्ष) के प्राप्ति की इच्छा करनी चाहिए। (३९)

परम पद (मुक्तावस्था) में नित्य जीवित ही है। वहाँ आयु का क्षय नहीं होता। वहाँ के जीवन में किसी अन्य के सहयोग की भी आवश्यकता नहीं रहती।

मुक्तावस्था में जीव जरा, व्याधि इत्यादि से त्रस्त और दुर्बल नहीं होता। संसार में किसी भी कार्य के लिए दूसरों के सहयोग की जरूरत होती है। वह सहयोग भी अनित्य होने से दुःखकर होता है। लेकिन मुक्तावस्था में ऐसे सहयोग की आवश्यकता नहीं रहती। (४०)

सर्वदा शरीररहित होने के कारण मोक्षावस्था में बीमारी, वार्धक्य, भूख़, प्यास नहीं रहते। उस अवस्था में दुःख का आत्यंतिक नाश होता है और अंत (मृत्यु) भी नहीं रहता। (४१)

परम पद में सभी सुखों की प्राप्ति होती है। आत्मा का कर्मबंध से मुक्त स्वातंत्र्य परम पद में ही रहता है।

संसार में सदैव कर्मवशता के कारण जीव का पारतंत्र्य ही होता है। (४२)

जिसका वर्णन भी नहीं किया जा सकता ऐसा श्रेष्ठ आनंद परम पद में प्राप्त होता है। इसलिए श्रेय की इच्छा करने वाले जीव ने परम पद ही प्राप्त करना चाहिए। (४३)

शुभ स्थान प्राप्त किये बिना ही जो सुखों की इच्छा करता है वह (जीव) मानो प्यास लगने पर मृगजल की इच्छा करता है।

मृगजल जैसे सिर्फ भासमान जल होता है, उसका वास्तविक अस्तित्व

नहीं होता, उसी तरह सांसारिक सुख भी भासमान सुख होते हैं। उनका भी चिरंतन अस्तित्व नहीं होता। (४४)

जिस कल्याणकारी जीव ने हृदय में मोक्ष स्थापन किया, उसी ने पवित्र धर्म से हुआ संयोग सफल किया।

मोक्षरूप चिरंतन आनंद की प्राप्ति कराना ही धर्म का उद्दिष्ट है, न कि सांसारिक सुखों की प्राप्ति कराना। इसलिए जिसने धर्माचरण से मोक्ष प्राप्ति के लिए प्रयत्न किये उसने धर्म के उद्दिष्ट को सफल किया। (४५)

जीव पुत्र, पत्नी तथा पितरों से संतुष्टि की इच्छा करते हैं। लेकिन वह अपनी ही आत्मा से संतुष्टि की इच्छा क्यूँ नहीं करते?

पुत्र, पत्नी तथा पितरों से मिलने वाले सुख की अनित्यता खूब प्रसिद्ध है। फिर भी अपनी ही आत्मा से मिलने वाले चिरंतन आनंद को छोड़ कर उस अनित्य सुख की इच्छा जीव क्यूँ करते हैं ऐसा आश्चर्य व्यक्त किया है। (४६)

जब तक इच्छाएँ पूर्ण नहीं होती, तब तक दुःखभोग निश्चित है। जब इच्छा ही नहीं रहेगी, तभी उत्कट सुख की प्राप्ति होगी। (४७)

अपनी इच्छाओं का विसर्जन करने के प्रति जो जागृत है वही सच्चा धार्मिक है। इच्छा के पीछे अनुसरण करने वाले सभी अधार्मिक जीव हैं। (४८)

जैसे जैसे जीव इच्छापूर्ति के लिए कार्य करते हैं, वैसे वैसे कोई असंतोषरूप अग्नि प्रज्ज्वलित हो उठती है।

इच्छापूर्ति के लिए पापकर्म करने के लिए भी जीव उद्युक्त होते हैं। उससे कर्मबंध की असंतुष्ट अग्नि प्रज्ज्वलित होती है। (४९)

भगवान का कहना है कि संसार में इच्छा के पिछे पिछे नहीं भागना चाहिए। क्योंकि इच्छा ही संसार का विस्तार करती है और दुःखों को बढ़ावा देती है। (५०)

धर्म सुखकर होता है और सुख के प्रति होने वाले राग का हरण भी करता है। इसलिए धर्म मनुष्यों का परम आनंददायक है।

यहाँ ज्ञातव्य है की धर्म जो सुख देता है वह क्षणिक सांसारिक सुख नहीं बल्कि मोक्षरूप चिरंतन आत्मिक सुख है। और उसका राग भी धर्म दूर कर देता है

जो अनित्य भौतिक सुख है। इस प्रकार से धर्म में सौख्यकर होना और सौख्यरागहर होना ये दोनों गुण एकत्र रहते हैं। (५१)

अतिशय दुर्लभ मनुष्यजन्म को पा कर जो धर्म से दूर रहते हैं, उनको आगामि जन्म में पुनः धर्म की प्राप्ति कैसे होगी?

मोक्ष के लिए आवश्यक धर्माचरण केवल मनुष्य जन्म में ही शक्य है। मनुष्य जन्म प्राप्त कर के भी यदि जीव धर्माचरण नहीं करेगा, तो पापाचरण से पतित हो कर फिर से मनुष्य जन्म नहीं पाएगा। अगर मनुष्य जन्म ही नहीं मिला तो फिर से धर्मपालन करना उसके लिए शक्य नहीं होगा। इसलिए बड़ी कठिनाई से प्राप्त इस मनुष्य जन्म में धर्म का ही पालन करना उचित है। (५२)

जीव सुख के प्रति आसक्ति और दुःख के प्रति भीति पुनः पुनः धारण करते आया है। अब उसे एक बार धर्म के प्रति प्रेम और आत्मा के विषय में चिंतन करके देखना चाहिए। (५३)

यहाँ (इस संसार में) जीवात्मा के जो पाप, दोष और दुर्गुण हैं वह केवल सौख्यराग से ही उत्पन्न हुए हैं। (५४)

सुख की इच्छा करने वाले जीव पापाचरण में मग्न होकर लज्जा और अपने कुल के श्रेष्ठ आचारों का भी त्याग कर के सैंकड़ों दुष्कार्य करते हैं। उनका आचरण पशु के समान रहता है।

सुखाभिलाषी जीव पशु की तरह केवल भौतिक सुखों के पीछे पडे रहते हैं और आत्मिक आनंद के बारे में सोच नहीं सकते। (५५)

अपने और दूसरों के दोष भी (कर्म से संबद्ध होने के कारण) हानिकारक होते हैं। दोषों से बहुत अपयश मिलता है और दुर्गति प्राप्त होती है। (५६)

जिसने अशुभ दुर्गुणों के कारण शुभ सद्गुणों का नाश किया उसने अपनी सद्गति (मुक्ति) नष्ट कर के दुर्गति (संसार में पुनरावृत्ति) ही निश्चित की। (५७)

जिनका चित्त अज्ञान से ग्रस्त है उनको दुर्गुणों, दोषों और पापों से कलंकित सुख की इच्छा वैसी ही नहीं दिखती।

सांसारिक सुख की इच्छा दुर्गुणों, दोषों और पापों से नित्य कलंकित होती है,

लेकिन अज्ञ जीवों को वो वैसी दिखती नहीं और वो उस को सुंदर समझ कर उसी में रममाण हो जाते हैं। (५८)

मोह बड़े सैन्य वाले राजा जैसा है। राग इत्यादि उसके सैनिक हैं। वह धर्ममार्ग पर चलने वालों के मन में भी मोह पैदा करने का प्रयत्न करते हुए उनको संतप्त करते हैं। (अज्ञानी और अधर्मी तो सहजता से उनकी चपेट में आ ही जाते हैं।) (५९)

मोक्षरूप आत्मिक सुख की इच्छा करने वाले ने मोह का पराभव करना चाहिए और राग और द्वेष को स्वामी जैसे सेवक को निबद्ध करता है, उसी तरह से निबद्ध करना चाहिए। (६०)

ग्रंथिदेश में स्थित और शुद्धयथाप्रवृत्ति का आश्रित (जीव) अपूर्वकरण से तीव्र रागद्वेषरूप ग्रंथि का नाश करता है।

जब जीव के कर्मों की स्थिति एक कोटाकोटिसागरोपम प्रमाण की हो जाती है, तब उसे ग्रंथिदेश प्राप्त हुआ ऐसा कहा जाता है। ग्रंथिदेश प्राप्त करने के लिए पुरुषार्थ की अपेक्षा नहीं रहती। इसलिए उसे यथाप्रवृत्तकरण कहते हैं। यथाप्रवृत्तकरण अपनी चरमावस्था में शुद्धयथाप्रवृत्तकरण कहा जाता है। इसमें स्थित जीव का कोई अभूतपूर्व परिणाम निकल आता है। उसे ही अपूर्वकरण कहा जाता है। इस अपूर्वकरण से जीव रागद्वेषरूप निबिड ग्रंथि का भेद करता है। उसके बाद सम्यक्त्वमोहनीय, मिथ्यात्वमोहनीय, मिश्रमोहनीय, और अनन्तानुबन्धि क्रोध, मान, माया, लोभ का क्षपण करता है। यही सात प्रकृतियाँ ‘दर्शनसप्तक’ के नाम से जानी जाती है। (६१)

दर्शनसप्तक को जीतने से अमूल्य सम्यक्त्व प्राप्त होता है। उसके बाद एक मोक्षकेंद्रित विचार का आविर्भाव होता है। (६२)

संसार छोडना चाहिए, दीक्षा लेनी चाहिए, मोक्ष पाना चाहिए यहीं तीन बातें हमेशा याद रखें।

जीव को चाहिए कि वो पहले सांसारिक सुखोपभोगों से निवृत्त हो, फिर संन्यस्त वृत्ति से जीवन जिये और अंत में मोक्ष को प्राप्त हो। यही तीन स्तरों का मार्ग शाश्वत है। (६३)

कर्म से संयोग होना रोग जैसा है। देह की संगति विकार है। इन दोनों

(कर्मसंयोग और देहसंगति) से जीव में वेदना का निर्माण होता है। इस पर मोक्ष ही (एकमात्र) उत्तम स्वास्थ्य है।

रोग होने से शरीर जैसे जर्जर होता है, वैसे ही कर्म से जीव की अवस्था होती है। देहरहित मुक्तावस्था जीव की प्रकृति है, लेकिन कर्मबंध के कारण देहसंयोगरूप विकार उसमें उत्पन्न होता है। इन दोनों के कारण जीव दुःख भोगता है जिसपर मोक्ष के अलावा दूसरा उपाय नहीं। (६४)

सांसारिक स्वार्थ की प्राप्ति के लिए आलस छोड़ कर जीव जितने यत्न करता है, उससे आधे यत्नों से ही मोक्ष की प्राप्ति हो जाएगी।

मोक्षप्राप्ति की सहजता इस में बताई है। सांसारिक सुख पाना मोक्ष पाने से भी कठिन है। उसके लिए जितने कष्ट उठाने पड़ते हैं, उन के आधे प्रयास भी मोक्ष के प्रति सच्ची ईमानदारी से हो जायें, तो मोक्ष मिल ही जाएगा। (६५)

अज्ञान की यह विचित्रता आश्चर्यकारक है कि दुःख देने वाले इस संसार में ही सभी जीवों का उत्कट आदर रहता है।

जीवों का दुःखदायक संसार के प्रति आदर और परमानंददायक मोक्ष के प्रति अनादर सदैव दिखाई पड़ता है। यह अज्ञानवश उत्पन्न विचित्रता बड़ी ही आश्चर्यकारक है। वस्तुतः संसार के प्रति अनादर और मोक्ष के प्रति आदर होना चाहिए। लेकिन अज्ञ जीव यह बात समझ नहीं पाते। (६६)

सम्यक्त्व रागभाव और द्वेषभाव इन दोनों को नष्ट करता है और श्रद्धाभाव के प्रकर्ष से आत्मा को परम शांति प्रदान करता है। (६७)

जैसे पीयूष सूर्य के ताप का हरण करता है, उसी तरह से सम्यक्त्व संसार के ताप का हरण करता है। (अज्ञान की) मूर्च्छा को वह दूर करता है, सत्त्व धारण करता है और पाप को नष्ट करता है। (६८)

संसार और आवास के प्रति उद्वेग, पाप का पश्चाताप, धर्म के मनोरथ और देव तथा गुरुओं के प्रति महान आदर, सम्यक्त्व से जागृत होता है। (६९)

जिनाज्ञा की अधीनता, विधि का अत्यंत आग्रह, सत्य का निरूपण और शास्त्रवर्णित का पालन ये भी सम्यक्त्व के लक्षण है। (७०)

सर्वदा साधना को लक्ष्य कर के आचरण, छह आवश्यक क्रिया, भवभ्रमण की भीति और सदैव निर्वाण का स्मरण यह भी सम्यक्त्व के लक्षण है।

सामायिक, स्तुति, वंदना, प्रतिक्रमणा, प्रत्याख्यान और कायोत्सर्ग यह षट् आवश्यक क्रियाएँ प्रसिद्ध है। (७१)

आगमादि श्रेष्ठ ग्रंथों का स्वाध्याय, उनसे प्राप्त ज्ञान के द्वारा लौकिक सुखों का अनित्यत्व जान कर उनके प्रति उद्वेग का विचार, लौकिक दुःखों के प्रति साम्यदृष्टि का अवलंबन और प्रव्रज्याग्रहण की इच्छा भी सम्यक्त्व के लक्षण हैं। (७२)

मन पर निग्रह का प्रयत्न, कर्म के क्षय में उद्युक्त बुद्धि और आत्मचिंतन में मग्नता यह गुण सम्यक्त्व से प्राप्त होते हैं। (७३)

प्रशम, संवेग, वैराग्य, आस्तिक्य और करुणा का आश्रित होकर बुद्धिमान मनुष्य ने सम्यक्त्व का चिंतन करना चाहिए।

प्रशम का अर्थ है शांति, संवेग है मोक्ष की इच्छा, वैराग्य है सांसारिक सुखों के राग का अभाव। इनके साथ ही आस्तिक्य अर्थात् जिनवचनों में आस्था और करुणा का आश्रय ले कर बुद्धिमान मनुष्य ने सम्यक्त्व का चिंतन करना चाहिए। प्रशम, संवेग, वैराग्य, आस्तिक्य और करुणा सम्यक्त्व की प्राप्ति के लिए आवश्यक हैं। (७४)

धर्मात्मा गुणों और गुणिजनों के प्रति प्रेम धारण करता है। वह दोष का द्वेष करता है, पर दोषिजनों के प्रति करुणा रखता है।

गुणों से ही सम्यक् धर्माचरण हो सकता है, इसलिए धर्मात्मा का गुण और गुणिजनों के प्रति प्रेम स्वाभाविक है। दोष धर्ममार्ग से भ्रष्ट कराने वाले होने से उसके लिए द्वेष्य हैं। लेकिन दोषिजन सम्यक् उपदेश से गुणग्रहण कर सकते हैं इसलिए उनके प्रति धर्मात्मा करुणा से देखता है। (७५)

जिनाज्ञा ही श्रेष्ठ धर्म है। जिनाज्ञा श्रेष्ठ क्रिया है। जहाँ जिनाज्ञा नहीं वहाँ धर्म भी नहीं और क्रिया भी नहीं। (७६)

संसार में जो भी भौतिक सुख दिखते हैं, वह सदैव दुःखों के साथ ही रहते हैं। अतः सुख ही दुःखकारक है।

'सुखं सांसारिकम्... ददाति दुर्गतिम्' इस श्लोक (क्र. १४) में यह बात विस्तार से स्पष्ट की गई है। (७७)

जो भी भौतिक दुःख हैं वह सारे कर्मक्षय करने वाले होते हैं। अतः उन दुःखों के नाश के लिए नया कर्मबंध निर्माण करने वाला कोई भी पाप नहीं करना चाहिए।

दुःखभोग से पूर्वकृत पापकर्मों का क्षय होता है। और कर्मक्षय के बाद दुःख भी अपने आप नष्ट हो जाते हैं। इसलिए भौतिक दुःख नष्ट करने के लिए कोई भी पापकर्म नहीं करना चाहिए। अन्यथा, वह कर्म नया कर्मबंध निर्माण करेंगे। (७८)

निर्वाणपद दिलाने वाले धर्म का आचरण भौतिक सुखलाभ के लिए नहीं करना चाहिए। जो कोट्यवधि दे सकते हैं, उनसे कुछ रुपये नहीं माँगे जाते। (७९)

जो धर्मप्रवृत्ति का आचरण केवल भौतिक सुख के लिए करेगा वह अपने ही हाथों से अपनी दुर्गति का निर्माण करेगा। (८०)

सुख के उपभोग से जीव कभी तृप्त हुए नहीं और होंगे भी नहीं। (क्योंकि लौकिक सुख की अभिलाषा उपभोग से कभी शांत नहीं होती, बढती ही है। उस के विपरीत—) जिन्होंने भौतिक सुख की आशा का त्याग किया वह जीव श्रेष्ठ तृप्ति (मोक्ष) को प्राप्त करते हैं। (८१)

मानव जन्म मूढ़ कर्मबंधों से अशुद्ध होता है। अज्ञ मनुष्य के द्वारा जो नहीं करना चाहिए वही किया जाता है और जो करना चाहिए वह नहीं किया जाता। (८२)

बलाढ्य राजा और धनवान व्यक्ति भी यहीं पर संपत्ति छोड के मृत हुए। फिर भी यह विश्व धन की वासना से छूट नहीं रहा है। (८३)

अन्नपानादि मोदसाधनों से खुद को सुखी मानने वाला जीव अपना वासनाधीनत्व देखने में समर्थ नहीं होता। (८४)

स्त्री, पुत्र, धन आदि परिग्रह के संग्रह कर के और लोगों के समक्ष महत्ता प्राप्त करने वाले महामूढ नर्क में गिरते हैं। (८५)

दानी, शीलवान्, तपस्वी, भावनाशील और धर्माचरण करनेवाले गृहस्थ भी सम्यक्त्व के संयोग से सद्गति प्राप्त करते हैं।(८६)

तत्त्वचिंतकों ने संसार का परित्याग कर परमार्थ की दीक्षा लेनी चाहिए। (८७)

दीक्षाग्रहण के सामर्थ्य का अभाव होना कोई दोष नहीं है। किंतु दीक्षाग्रहण की इच्छा का ही अभाव होना अत्यंत दोषास्पद है। (८८)

जो जो तीर्थंकर हुए हैं और जो भी होंगे वह सब परिव्रज्या का पालन करने से ही संसार तारक बने हैं। (८९)

श्रेष्ठ मनुष्यों ने आँठवे वर्ष में ही दीक्षा लेनी चाहिए। इस आयु के बाद ली गई दीक्षा विलंबकारी मानी गई है। (९०)

जिन्होंने दीक्षा का स्वीकार किया है, उनका जीवन सफल होगा। क्योंकि दीक्षा आत्मा को परमानंद देने वाली और पारमेश्वरी होती है। (९१)

दीक्षा कभी भी अपात्र को नहीं देनी चाहिए। जैसे, सिंही का दूध कभी मिट्टी के पात्र में नहीं रखा जाता। (९२)

आराधना में रस लेने वाले गृहस्थों ने भी प्रथम योग्यता प्राप्त करनी चाहिए (और उसके बाद दीक्षा ग्रहण करनी चाहिए।) क्रमानुसार चलने से ही लाभ होता है, क्रमनाश से हानि ही होती है। (९३)

मार्ग का यथाक्रम अनुसरण ही धर्म की ओर पहला चरण है। पैंतीस गुणों से शुभ स्वभाव प्राप्त होता है। (९४)

सम्यक् दर्शन के लाभ से शम आदि पहले बताये गये गुणों का उद्भव होता है। यही परमार्थ धर्म की ओर दूसरा मंगल चरण है। (९५)

अरिहंतों के धर्म पर निष्ठा रखनेवालों के इक्कीस सद्गुणों की स्तुति की गई है। (उनकी प्राप्ति ही) धर्म की ओर अगला (तीसरा) चरण है। (९६)

भावश्रावकधर्म के सत्रह गुण और बारह व्रतों से युक्त होना धर्म की ओर चौथा चरण है। (९७)

श्रद्धावंतों से एकादश प्रतिमाओं का भी यथाशक्ति पालन किया जाता है। यह भगवद्दीक्षाग्रहण का निर्दोष क्रम है। (९८)

जिसने गुरु से पंच महाव्रतों के साथ दीक्षा ली है, उसने पच्चीस भावनाओं का भी अंगीकार करना चाहिए। (९९)

प्रमादरूप शत्रु को जीतना चाहिए, दुःखकारी गर्व का नाश करना चाहिए, अधिकाधिक ज्ञान प्राप्त करना चाहिए और गुरु की ईश्वर जैसी सेवा करनी चाहिए। (१००)

सदैव परसंयोग से डरना चाहिए, शुद्ध आत्मा का ध्यान करना चाहिए, आचरण सन्मार्ग से ही करना चाहिए।

परसंयोग है किसी भी दूसरी व्यक्ति या वस्तु से सुख की अपेक्षा से संयोग। वह कर्मबंध बनाने वाला और अनित्य होने से अंततः दुःखदायक ही होता है। इसीलिए उससे डर कर दूर रहना चाहिए। (१०१)

मान और अपमान में साम्यदृष्टि, लाभ और अलाभ में तुल्यता, सुख और दुःख में समाधान यह (द्वंद्वभेद का अभाव ही) साधु का सुलक्षण है। (१०२)

विद्वानों ने तीर्थंकरों के उपदेशानुसार ही बोलना चाहिए। प्रतिक्षण भगवंतों के बताये मार्ग पर ही जीना चाहिए। (१०३)

सिंह के समान दृढ पराक्रम से लोकसंज्ञा का परित्याग करना चाहिए। यह जीवन लोगों के लिए नहीं, बल्कि शासन के लिए है। (१०४)

सत्त्वयुक्त पुरुषों ने सत्य का ही ध्यान, गान और रक्षण करना चाहिए। सत्य के योग से ही धर्म है। सत्य नष्ट होने पर हमारा भी नाश निश्चित है। (१०५)

सत्यधर्म के मार्ग पर चलते हुए एकांतवास भी सहना पड़े तो वह असत्य के योग से मिलने वाले लाखों लोगों के महोत्सव से भी बड़ा है। (१०६)

जिस मार्ग पर जाने से आगामि भव में मोक्ष मिले, उसी मार्ग पर चलना चाहिए यह सर्वज्ञों का मत है। (१०७)

सभी आत्मा भवक्षय से परमानंद प्राप्त करें यही एक सब की सुखावह शुभाभिलाषा है। (१०८)

तपागच्छाधिराजपूज्यपादाचार्यवर्य—
श्रीमद्विजयरामचन्द्रसूरीश्वरोपदिष्टा
मुनिश्रीप्रशमरतिविजयविरचिता

# ॥शुभाभिलाषा॥

## (સંસ્કૃત ટીકાનો ગુજરાતી ભાવાર્થ)

આખા વિશ્વની યોનિને સારી રીતે જાણનારા, જગતના ગુરુ, વિશ્વને આનંદ આપનારા, જગતના ભાઇ અને પતિ ભગવાન મહાવીરનો જય થાઓ. (૧)

(આ ગ્રંથનું આરંભિક મંગલાચરણ છે. જેમાં કવિએ ભગવાન મહાવીરની સ્તુતિ કરી છે. પોતાના આધ્યાત્મિક જ્ઞાનથી ભગવાન વિશ્વના બધા જીવોની યોનિ જાણે છે. મોક્ષમાર્ગ બતાવવાને કારણે તે જગતના ગુરુ છે. મોક્ષ આપનારા હોવાને કારણે જગતને આનંદ આપનારા છે. મુક્તિ માટે મોટા ભાઇની જેમ સહાય કરનારા હોવાથી જગદ્‌ભ્રાતા અને આખા વિશ્વના આરાધ્ય પરમેશ્વર હોવાથી જગત્પતિ પણ છે. વીર, અતિવીર, સન્મતિ, વર્ધમાન, મહાવીર આદિ પાંચ નામોથી વિખ્યાત ભગવાન માટે આ પદ્યમાં પાંચ વિશેષણોનો ઉપયોગ કર્યો છે.)

જગતના પિતામહ, કરુણાના ઘર, શ્રુતના પ્રભવ અને તીર્થંકરોમાં અંતિમ સ્વામી ભગવાન (મહાવીર)ની વિજય થાઓ. (૨)

(ઘરમાં જેમ પિતામહ પોતાના અનુભવ અને જ્ઞાનથી બધા લોકોને માર્ગદર્શન કરે છે, તેમ જ ભગવાન પણ આત્માનુભવ અને આત્મજ્ઞાનથી આખા વિશ્વને મોક્ષનું માર્ગદર્શન કરે છે. તે પોતે કરુણાના ઘર છે. એમનાથી જ આગમોનો વિકાસ થયો છે. એથી તે શ્રુતના પ્રભવ કહેવાયા છે. તીર્થંકરોમાં અંતિમ છતાં સર્વશ્રેષ્ઠ પણ છે.)

વિશ્વને ધર્મમાર્ગ દર્શાવનારા મહાત્મા ચિરકાળ સુધી વિજયી થાઓ. નંદીસૂત્રના પ્રારંભમાં જેમની સ્તુતિ કરાઈ છે તે (ભગવાન મહાવીર) તમારા મોક્ષ આપનારા થાઓ. (૩)

અનંત ઉપકારી શ્રી અરિહંતોના ઉપદેશને ચિત્તમાં નિત્ય ધારણ કરવો જોઇએ. (૪)

સંસારનો અર્થ થાય છે સંસરણ. જીવનાં પોતાના કર્મોના ફળથી સંયોગ અને રાગદ્વેષમાં પરિભ્રમણ સંસાર કહેવાય છે. જન્મ અને મૃત્યુની સાથે જ રહેવાવાળા સંસારમાં કેવલ દુ:ખ છે. સુખરસમાં આકર્ષિત થનારો જીવ સંસારમાં કરોડો કષ્ટોથી બંધાય છે. (૫)

જન્મ અને મરણ બન્ને દુ:ખ આપનારા છે. જન્મ પણ વેદનાઓથી થાય છે અને મરણ પણ વ્યાધિ અને વૃદ્ધતાને કારણે શરીરનો ક્ષયથી થાય છે. આ બન્નેની વચ્ચેના જીવનમાં પણ વિવિધ પ્રકારના દુ:ખોથી જ સંગમ થાય છે. સુખનો આભાસ કરાવનારા અનુભવો પણ ક્ષણવારમાં નષ્ટ થઇ જવાથી અંતમાં દુ:ખદાયક જ રહે છે. એ માટે જ જન્મથી લઇને મૃત્યુ સુધીનું જીવન તિરસ્કરણીય છે. (૬)

આ અસાર અને અપાર સંસારમાં સુખની અભિલાષા કરવાવાળા જીવ જે કરે છે તેનાથી એના દુ:ખ જ વધે છે. શાશ્વત સુખનો અભાવ હોવાથી સંસારને અસાર કહેવાયો છે. સુખના અભિલાષી જીવોના સંસારમાં જ ફરી બંધનને કારણે પાર કરવા માટે કઠિન હોવાથી તે અપાર કહેવાયો છે. (૭)

સંસારના પ્રેમીને લાગે છે કે 'બધાં સુખ જ મળ્યા કરે' અને આ વિચાર જ તેના સુખોના નાશનું કારણ થાય છે. (૮)

ભરપૂર સામગ્રીથી જો જીવોના સુખ પ્રાપ્ત થાત તો ધનવાન વ્યક્તિ ચિંતાઓના ભારથી પરાભૂત કેવી રીતે દેખાત? ધનવાન વ્યક્તિઓ પણ ચિંતાગ્રસ્ત અને દુ:ખી હોવાથી સંપત્તિ અને સાધનસામગ્રીની વિપુલતા સુખનું કારણ ન માની શકાય. (૯)

ધન, સંપત્તિ અને પત્ની, પુત્ર આદિ પરિગ્રહમાં સદૈવ સુખ જોનાર અજ્ઞાની જીવો તેને જ પામવા માટે પ્રયત્ન કરે છે. (પરંતુ પરિગ્રહ પણ અનિત્ય હોવાથી) દુ:ખોથી જ બંધાતા પોતાને તે જાણતો નથી. (૧૦)

(ભૌતિક) સુખોના ઉપભોગમાં રમમાણ, (સંપત્તિના) મદથી ઉન્મત્ત, (અહંકારને કારણે) વિવેકહીન જીવ પોતાના પુણ્યનાશ, પાપબંધ, દુર્ગતિ, અને દુષ્ટ ભાવનાને જાણતો નથી.

પૂર્વમાં કરેલાં સારાં કર્મોથી સુખની પ્રાપ્તિ થાય છે, અને સુખના ઉપભોગથી તે પુણ્યકર્મોનો નાશ પણ છે. સર્વદા સુખની અભિલાષા રાખવાથી મનમાં ખરાબ ભાવનાનો અવિર્ભાવ થાય છે. સુખ પામવા માટે દુષ્કૃત્ય કરવાથી પાપનો બંધ

થાય છે, અને તે પાપબંધથી દુર્ગતિ પ્રાપ્ત થાય છે. (૧૧)

પૂર્વ જન્મમાં કોઇ સત્કર્મથી પામેલું શ્રેષ્ઠ પુણ્ય સજ્જનોએ કેવલ (ભૌતિક) સુખની ઇચ્છાથી નષ્ટ ન કરવું જોઇએ.

ફળના ઉપભોગથી કર્મનો ક્ષય થાય છે આ સિદ્ધાંત છે. એથી સુખના ઉપભોગથી પુણ્યનો નાશ થાય છે. તત્ત્વાર્થસૂત્રમાં પણ કહેવાયું છે- “शुभः पुण्यस्य अशुभः पापस्य”। (૧૨)

પાપકર્મોથી જ (જીવ પર) દુઃખોનું દારુણ આગમન થાય છે. સુખથી જ પાપોનો આત્મા સાથે સંગમ થાય છે.(૧૩)

(આના માટે અગ્યારમા શ્લોકમાં વિસ્તારથી કહ્યું છે.)

સાંસારિક સુખ જીવને તુચ્છ આનંદ આપીને પછી નવા દઢ કર્મબંધ કરાવી દુર્ગતિ આપે છે. (૧૪)

સાંસારિક સુખ અનિત્ય હોવાને કારણે તેને તુચ્છ કહ્યું છે. એ સુખ પામવા માટે કરેલા કર્મ નવા બંધ નિર્માણ કરે છે અને અંતમાં જીવને દુર્ગતિ આપે છે.

દેહ, સંપત્તિ, કુટુંબ આદિ દ્વારા સુખ મેળવવામાં રમમાણ જીવ અધ્યાત્મની સાધક પાવન ભાવનાને દૂર છોડે છે. (૧૫)

શ્રેષ્ઠ વિદ્વાનોનું કહેવું છે કે,- મનના ભાવથી જ સુખ અને દુઃખ નિર્માણ થાય છે. એટલે મન જ મનુષ્યના બંધ અને મોક્ષનું કારણ છે. (૧૬)

બાહ્યઘટક તો કેવળ નિમિત્તમાત્ર છે. તેનાથી સંલગ્ન મનોભાવ જ સુખ અને દુઃખ પેદા કરે છે. એટલે મનને બંધ અને મોક્ષનું કારણ કહેવાયું છે. જો મન પર સંયમ રાખો તો બાહ્ય ઘટકો પર અવલંબિત સુખ અથવા દુઃખનો આવિર્ભાવ જ મનમાં નહીં થાય અને બંધ પણ નહીં થાય.

સુખનું રસિક ચિત્ત દુઃખ સહન કરવામાં સમર્થ નથી થતું. પણ જેનો સુખનો રસ ઓછો હોય તે માણસ દુઃખ સહન કરે છે.(૧૭)

દુઃખના અનુભવથી જીવ પરિગ્રહની વ્યર્થતા પણ જાણે છે.

સંસારમાં દુઃખ ભોગવવું પડે છે તેમાં કંઇ પણ નવું નથી. દુઃખ જો સંસારમાં નહીં મળે તો શું મોક્ષમાં રહેશે? (૧૮)

મોક્ષમાં દુઃખના અભાવના દઢીકરણ માટે આ પ્રશ્ન કરાયો છે.

સર્વ પ્રકારની આધિવ્યાધિઓથી યુક્ત આ અનાદિ સંસારમાં સુખ પર રાગની વૃત્તિ અને દુઃખ પર દ્વેષની વૃત્તિ સહજ નિર્માણ થઇ છે. (૧૯)

કર્મથી આહત અને અજ્ઞાનથી આવૃત જીવ પોતાનો સુખ અને દુઃખથી નિવૃત્ત રહેનારો મૂળ શાંત સ્વભાવ ભૂલી જાય છે. (૨૦)

આ (અજ્ઞ જીવ) જેમાં પણ સુખ જૂએ છે, ત્યાં દુઃખની જ પરંપરા હોય છે. કરુણાના સાગર શ્રીમાન્ જિનેશ્વરે આ (પરંપરા) બતાવી છે.(૨૧)

શરીરના સંયોગથી જીવ દુઃખ ભાજન બને છે. તે દેહમાં મમત્વ છે તે કારણે જીવમાં સુખ અને દુઃખનો અનુભવ જાગૃત થાય છે. (૨૨)

જ્યારે જીવ શરીર રહિત અવસ્થા પ્રાપ્ત કરે છે ત્યારે તેમાં દુઃખનો લવલેશ પણ નથી રહેતો. (૨૩)

કર્મના પ્રભાવથી જ 'પુદ્ગલ' રૂપ શરીર ઉત્પન્ન થાય છે. કર્મનાશ માટે જે પુરૂષાર્થ થાય તે દ્વારા જીવનો દુઃખનાશ પણ નિશ્ચયથી થાય છે. (૨૪)

સંસારમાં કર્મસત્તાને આધીન રહેવું એ જ એકમાત્ર દુઃખ છે. અને તે કર્મસત્તાનો પરાજય કરવો એ સંસારનું એકમાત્ર સુખ છે. (૨૫)

ધન આદિના ઉપાર્જનમાં જેમ જીવ મોટો પુરુષાર્થ કરે છે. તેમ જ કર્મના નાશ માટે પણ જીવે વિશેષ પ્રયત્ન કરવો જોઇએ. (૨૬)

જેનાથી દેહની આસક્તિ નષ્ટ થાય છે, કર્મનો ઘણો નાશ થાય છે અને સંસારનો અંત થાય છે તે ધર્મ શ્રેયસ્-નો અર્થાત્ મોક્ષનો માર્ગ છે. (૨૭)

સ્વતંત્ર વિચારથી કલ્યાણ નથી થતું. ભગવાનનાં વચનોના અભ્યાસથી શુભકારી ધર્મનો લાભ થાય છે. (૨૮)

સ્વતંત્ર વિચારોથી જો કોઇ ધર્મમાર્ગ પર પણ ચાલે તો પણ તેનામાં અહંકારનો પ્રવેશ અને માર્ગથી સ્ખલનાની સંભાવના અત્યધિક રહે છે. એટલે મોક્ષની ઇચ્છા રાખવાવાળાએ ભગવાનના વચનાનુસાર જ ધર્મમાર્ગ પર ચાલવું જોઇએ.

જીવ સંસારના દરેક જન્મમાં સુખ અને દુઃખ જેવા દ્વંદ્વ ભાવોથી ઘેરાયેલો રહ્યો છે, પણ જીવ ધર્મના ચિંતનમાં મગ્ન રહ્યો નથી. (૨૯)

આ કારણે જીવની ભોગ આદિમાં પ્રવૃત્તિ તેને જન્મ સાથે જ જોડાયેલી હોય છે. એવામાં આરાધનાના વિચાર પણ દુર્લભ અને દુષ્કર બની જાય છે. (૩૦)

આ પ્રમાણે આત્મધર્મથી વિયુક્ત અને મોહની આધીન દશા ધારણ કરનારો જીવ સુખ-દુઃખના વિભ્રમ રૂપ તાંડવમાં ફસાઇ જાય છે. (૩૧)

સમ્યગ્દર્શન પ્રાપ્ત કરનાર જીવ માનસિક દુઃખને જલ્દીથી જીતી લે છે. મિથ્યાત્વથી બાધિત જીવ અંતરંગ દુઃખોથી નિત્ય પીડિત રહે છે. (૩૨)

સમ્યગ્દર્શન પામવાથી જીવ સાંસારિક ભોગોની વ્યર્થતા સમજે છે, અને દુઃખથી યુક્ત ચિત્ત પર વિજય મેળવે છે. પણ મિથ્યાત્વથી બાધિત જીવ, જેમ પહેલા પણ બતાવ્યું છે, અંતરંગ દુઃખોથી હંમેશા પીડિત રહે છે.

સંસારી જીવ દુઃખના દ્વેષથી અને સુખના પ્રેમથી જે પણ પ્રવૃત્તિ કરે છે, તે તેના દુઃખની વૃદ્ધિ અને સુખના ક્ષયનું જ કારણ બને છે. (૩૩)

સુખ-દુઃખ, પ્રેમ-દ્વેષ આદિ વિરોધોથી જ લૌકિક જીવન ભરેલું છે. અને આ દ્વંદ્વના બન્ને વિભાગ દુઃખનું જ કારણ બને છે.

રાગ અને દ્વેષ સદૈવ જીવની સાથે ચાલે છે. આનો તીવ્રતાનો આવેશ જ આત્માના મૂળ ચૈતન્ય સ્વભાવનો બાધક થાય છે. (૩૪)

તેમાં પણ રાગ જીવનો મહાશત્રુ છે. તે ઘણો બળવાન પણ છે. એથી જેણે રાગને જીત્યો તેણે પૂરું વિશ્વ જીત્યું. (૩૫)

જે પ્રાપ્ત થયું છે અને જેને પ્રાપ્ત કરવાની આશા છે તે બન્નેમાં રાગની પ્રવૃત્તિ હોય છે. રાગ અતૃપ્ત રહેવાથી દ્વેષગર્ભિત વિકાર ઉત્પન્ન થાય છે. (૩૬)

પ્રાપ્ત વસ્તુના નાશથી અને ઇષ્ટ વસ્તુની અપ્રાપ્તિથી રાગ અતૃપ્ત રહે છે.

દ્વેષ પર વિજય મેળવવો સહેલો છે, પણ રાગનો નિગ્રહ કરવો કઠિન છે. એટલે જે જીવે પોતાનું ચિત્ત રાગથી મુક્ત કર્યું હોય તેનો પરમસુખથી સમાગમ થઇ ગયો છે એમ સમજો. (૩૭)

દ્વેષનું મૂળ પણ રાગમાં હોય છે. એટલે દ્વેષ પર વિજય મેળવવો એ રાગના નિગ્રહથી અધિક સુલભ છે.

રાગથી આતુર વ્યક્તિ પ્રસન્ન, પ્રશાંત અને પ્રબુદ્ધ હોય એવું ક્યારે પણ થયું નથી અને આગળ પણ નહીં થાય. (૩૮)

દુઃખોથી બચવું હોય અને સુખનો (ચિરંતન) સંગમ જોઇતો હોય તો વિદ્વાનોએ નિર્વાણપદ(મોક્ષ)ને મેળવવાની ઇચ્છા કરવી જોઇએ. (૩૯)

પરમપદ(મુક્તાવસ્થા)માં નિત્ય જીવન જ છે ત્યાં આયુષ્યનો ક્ષય

નથી થતો. ત્યાંનાં જીવનમાં કોઇ બીજાના સહયોગની પણ આવશ્યકતા નથી હોતી. (૪૦)

મુક્તાવસ્થામાં જીવ જરા, વ્યાધિ ઇત્યાદિથી ત્રસ્ત અને દુર્બલ નથી થતો. સંસારમાં કોઇ પણ કાર્ય માટે બીજાના સહયોગ જરૂર પડે છે. તે સહયોગ પણ અનિત્ય હોવાથી દુઃખકર છે. પણ મુક્તાવસ્થામાં એવા સહયોગની આવશ્યકતા નથી રહેતી.

સર્વદા શરીરરહિત હોવાથી મોક્ષાવસ્થામાં બિમારી, વાર્ધક્ય, ભૂખ, તરસ નથી રહેતા. તે અવસ્થામાં દુઃખનો આત્યંતિક નાશ થાય છે. (૪૧)

પરમ પદમાં બધાં સુખોની પ્રાપ્તિ થાય છે. આત્માનો કર્મબંધથી મુક્ત એવો સ્વતંત્ર્ય સ્વભાવ પરમપદમાં જ છે. (૪૨)

સંસારમાં સદૈવ કર્મવશતાને કારણે જીવનું પારતંત્ર્ય જ હોય છે.

જેનું વર્ણન પણ ન કરી શકાય એવો શ્રેષ્ઠ આનંદ પરમપદમાં પ્રાપ્ત થાય છે. એટલે કલ્યાણના ઇચ્છુક જીવે પરમપદ જ પ્રાપ્ત કરવું જોઇએ. (૪૩)

મોક્ષ પ્રાપ્ત કર્યા વગર જ જે સુખી થવાની ઇચ્છા રાખે છે તે (જીવ) જાણે તરસ લાગી હોય ત્યારે મૃગજળની ઇચ્છા કરે છે. (૪૪)

મૃગજલ જેમ ફક્ત આભાસી જળ હોય છે, તેનું વાસ્તવિક અસ્તિત્વ હોતું નથી, તેમ જ સાંસારિક સુખ પણ આભાસી સુખ હોય છે, તેનું પણ ચિરંતન અસ્તિત્વ હોતું નથી.

જે કલ્યાણકારી જીવે હૃદયમાં મોક્ષને બિરાજમાન કર્યો, તેને મળેલો ધર્મ સફળ થઇ ગયો. (૪૫)

મોક્ષરૂપ ચિરંતન આનંદની પ્રાપ્તિ કરવી જ ધર્મનો ઉદ્દેશ છે, નહીં કે સાંસારિક સુખોની પ્રાપ્તિ. એટલે જેણે ધર્માચરણથી મોક્ષ પ્રાપ્તિ માટે પ્રયત્ન કર્યો તેણે ધર્મના ઉદ્દેશને સફળ કર્યો.

પુત્ર, પત્ની તથા પિતા દ્વારા સંતોષ મળે તેવું જીવ વિચારે છે પણ તે જીવ પોતાના જ આત્માદ્વારા આવો સંતોષ મળે એવી ઇચ્છા કેમ નથી કરતા? (૪૬)

પુત્ર, પત્ની તથા પિતાથી મળવાવાળા સુખની અનિત્યતા ખૂબ પ્રસિદ્ધ છે. તો પણ પોતાના જ આત્માથી મળનારા ચિરંતન આનંદને છોડીને તે અનિત્ય સુખની ઇચ્છા જીવ કેમ કરે છે એવું આશ્ચર્ય વ્યક્ત કર્યું છે.

જ્યાં સુધી ઇચ્છાઓ પૂરી નથી થતી ત્યાં સુધી દુઃખ આવશે એ નિશ્ચિત છે. જ્યારે ઇચ્છા ઊભી નહીં થાય ત્યારે ઉત્કટ સુખની અનુભૂતિ અવશ્ય થશે. (૪૭)

પોતાની ઇચ્છાઓનો પરિત્યાગ કરવામાં જે જાગૃત છે તે સાચો ધાર્મિક છે. ઇચ્છાની પાછળ વહેવાવાળા બધાં અધાર્મિક જીવ છે. (૪૮)

જેમ જેમ જીવ ઇચ્છાપૂર્તિ માટે કાર્ય કરે છે તેમ તેમ અસંતોષરૂપ કોઇ ભારે અગ્નિ પ્રજ્જ્વલિત થઇ જાય છે. (૪૯)

ઇચ્છાપૂર્તિ માટે પાપકર્મ કરવા પણ જીવ ઉદ્યત થાય છે. તેનાથી કર્મબંધનો અસંતુષ્ટ અગ્નિ પ્રજ્જ્વલિત થાય છે.

ભગવાન ફરમાવે છે કે, સંસારમાં ઇચ્છાનુસારી વર્તન ક્યારેય નહીં કરવું જોઇએ. કેમ કે ઇચ્છા જ સંસારનો વિસ્તાર કરે છે અને દુઃખોને વધારે છે. (૫૦)

ધર્મ સુખકર તો છે જ, ધર્મ સુખના રાગને દૂર પણ કરે છે. માટે ધર્મ મનુષ્યોની માટે પરમ આનંદનું કારણ બને છે. (૫૧)

ધર્મ જે સુખ આપે છે તે ક્ષણિક સાંસારિક સુખ નથી પણ મોક્ષ રૂપ ચિરંતર આત્મીય સુખ છે. અને જેના રાગને ધર્મ દૂર કરે તે અનિત્ય ભૌતિક સુખ છે. આવી રીતે ધર્મમાં સુખકર થવું અને સુખના રાગને દૂર કરનારા થવું આ બન્ને ગુણો એકત્ર રહે છે.

અતિશય દુર્લભ મનુષ્યજન્મને પામીને જે ધર્મથી દૂર રહે છે તેને આવતા જન્મમાં પાછો ધર્મ કેવી રીતે મળે? (૫૨)

